॥ श्रीः ॥

॥ श्रीरामचन्द्रो विजयतेतराम् ॥

# ॥ श्रीरामभक्तिकल्पलता ॥

अयं ग्रन्थः

( राम-सीता-रामायणमहिमप्रतिपादकेभ्यः प्राचीनमहर्षि-
प्रणीतेभ्यः ग्रन्थेभ्यः समुद्धृतानां केषाञ्चित्
मुख्यलघुप्रकरणानां संग्रहात्मकः )

( उत्तरभागः )

पण्डितवरजोघुष्यमाणवैदुष्यैः

T. M. नारायणशास्त्रिमहाशयैः

सम्यक्परिशोधितः

मध्यार्जुनक्षेत्रवासिना वलङ्गिमान् ग्रामाभिजनेन
"कविमणि"-"कवितल्लज" बिरुद्भाजा
पण्डित

वि. के. सुब्रह्मण्यशास्त्रिणा

सम्पाद्य

कुम्भघोणदुग्धोदधिराकाशशाङ्कायमाने

शारदाविलासमुद्रणालये

मुद्रापयित्वा प्रकाशितः ।

विक्रमसंवत्सरे वैशाखमासि ।

॥ श्रीः ॥

# विषयसूचिका ॥


| विषयः | पुटम् |
| --- | --- |
| प्रातःस्मरणम् | १ |
| सुन्दरकाण्डपारायणक्रमः | २ |
| श्रीरामचन्द्रप्राणप्रतिष्ठाविधिः | २१ |
| श्रीरामनवमीपूजाविधिः | २३ |
| श्रीरामनवमीव्रतकथा | ३७ |
| तत्र रामचन्द्रसुप्रभातस्तोत्रम् | ५२ |
| रामायणपारायणक्रमः | ५९ |
| तत्र सम्पूर्णरामायणपारायणविधिः | ६१ |
| श्रीमद्बालकाण्डस्य | ६३ |
| अयोध्याकाण्डस्य | ,, |
| आरण्यकिष्किन्धाकाण्डयोः | ६४ |
| नित्यसंपूर्णरामायणपारायणान्तर्गत सुन्दरकाण्डस्य | ६५ |
| काम्यसुन्दरकाण्डपारायणस्य | ६६ |
| मुमुक्षुसुन्दरकाण्डपारायणस्य | ६७ |
| युद्धकाण्डस्य | ,, |
| उत्तरश्रीरामायणस्य | ६८ |
| सीतापूजाप्रकारः | ७० |

॥ श्रीः ॥

## ॥ श्रीचन्द्रमौळीश्वर ॥

[ SEAL. ]

स्वस्ति श्रीमदखिलभूमण्डलालङ्कारत्रयस्त्रिंशत्कोटिदेवतासेवित श्रीमदेकाम्रनाथ श्रीमहादेवीसनाथ श्रीहस्तिगिरिनाथसाक्षात्कारपरमाधिष्ठान सत्यव्रतनामाङ्कित काञ्चीदिव्यक्षेत्रे शारदामठसुस्थितानां, अतुलितसुधारसमाधुर्य कमलासनकामिनीधम्मिल्लसम्फुल्लमल्लिकामालिकानिष्यन्दमकरन्दझरीसौवस्तिकवाङ्निगुम्भविजृम्भमाणानन्दतुन्दिलितमनीषिमण्डलानां, अनवरताद्वैतविद्याविनोदरसिकानां, निरन्तरालङ्कृतीकृतशान्तिदान्तिभूम्नां, सकलभुवनचक्रप्रतिष्ठापकश्रीचक्रप्रतिष्ठाविख्यातयशोलङ्कृतानां, निखिलपाषण्डषण्डकण्टकोद्घाटनेन विशदीकृतवेदवेदान्तमार्गषण्मतप्रतिष्ठापकाचार्याणां, श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीजगद्गुरु श्रीमच्छङ्करभगवत्पादाचार्याणां, अधिष्ठाने सिंहासनाभिषिक्तश्रीमन्महादेवेन्द्रसरस्वतीसंयमीन्द्राणां, अन्तेवासिवर्य श्रीमच्चन्द्रशेखरेन्द्रसरस्वती श्रीपादैः,

अस्मदत्यन्तप्रियशिष्य वलङ्गिमान् ग्रामाभिजन कृष्णशास्त्रि तनूज सुब्रह्मण्यशास्त्रिविषये सर्वाभीष्टसिद्ध्यै क्रियते नारायणस्मृतिः ॥

भवतः शास्त्रपाण्डित्यसहकृतां साहितीनैपुणीमालक्ष्य सुतरां सन्तुष्टान्तरङ्गा वयं भवन्तं "कवितल्लजः" इत्यनेन विरुदेनानुगृह्णीमः ॥

मकाम् विष्णुपुरम्,
प्रमाथिसं—पौषकृ० ६.

नारायणस्मृतिः ॥

---

N. B:— इयंच योग्यतापत्रिका जगद्गुरुभि विष्णुपुरग्रामे महति सदसि सभ्यानां पुरतो वाचयित्वा ( ஜோடி சால்வை ) सम्मानपुरस्सरं प्रशंसावचनपुरस्सरं च सानुग्रहं वितीर्णा ॥

॥ श्रीः ॥

॥ श्रीरामो जयति ॥

# ॥ श्रीरामभक्तिकल्पलता ॥

## ( उत्तरभागः )

अथ प्रातस्स्मरणमगस्त्यमुनिकृतम् ॥

प्रातः स्मरामि रघुनाथमुखारविन्दं
लम्बालकावळिमधुव्रतमुग्धशोभम् ।
मन्दस्मितांशुमहनीयमराळशोभं
कारुण्यपूरितकटाक्षकृतार्तरक्षम् ॥ ॥१॥

प्रातः शृणोमि रघुनायकवाक्यजालं
दीनौघरक्षणमहाव्रतलब्धमूलम् ।
श्रोष्यामि येन न कथञ्चन कालदूत-
वक्त्रोद्गतं जहि विदारय ताडयेति ॥ ॥२॥

प्रातर्भजामि रघुनायकवामहस्तं
कोदण्डदण्डपरिमण्डितमद्भुताभम् ।
यद्दर्शनाद्धृदयमाशरपुङ्गवानां
सद्यस्स्फुटत्यखिललोकजयोद्धतानाम् ॥ ॥३॥

प्रातश्श्रयामि रघुनायकदक्षहस्तं
साधुद्रुहां विदळनोत्सुकबाणयुक्तम् ।

आर्ताभयार्पणमहाव्रतबद्धदीक्षं
दीनाळ्यभीष्टवरदानसुधाशनद्रुम् ॥ ॥४॥

प्रातर्नमामि रघुनाथपदारविन्दं
देवासुरोरगमुनीन्द्रमनुष्यवन्द्यम् ।
यत्स्पर्शभाग्यवशतो भरतप्रियार्थं
साम्राज्यमाप किल दारु च पादुकाख्यम् ॥५॥

॥ इति प्रातस्स्मरणम् ॥

॥ श्रीरामश्शरणं मम ॥

---

॥ श्रीः ॥

## ॥ अथ सुन्दरकाण्डपारायणक्रमः ॥

उमोवाच—

काण्डस्य सुन्दराख्यस्य माहात्म्यं तु महेश्वर ।
श्रोतुमिच्छामि ते वक्त्रात् विस्तराच्च विशेषतः ॥१॥

श्रीमहेश्वर उवाच—

श्रीमत्सुन्दरकाण्डस्य माहात्म्यमतिगोपितम् ।
वक्ष्यामि शृणु ते प्रीत्या संग्रहेण गिरीन्द्रजे ॥२॥

विस्तराद्वक्तुमीशस्तत् सएव रघुनन्दनः ।
यथा सर्वेषु देवेषु श्रीरामः परमो मतः ॥३॥

यथा सर्वेषु वृक्षेषु कल्पवृक्षो ह्यनुत्तमः ।
यथा सर्वेषु रत्नेषु कौस्तुभः श्लाघ्यते वरः ॥४॥

तथा रामायणे श्रीमान् सुन्दरः काण्ड उत्तमः ।
पठनाच्छ्रवणादस्य भक्त्या प्रवचनादपि ॥५॥

सिध्यन्ति सिद्धयस्सर्वाः अनर्थश्च विनश्यति ।
पूर्यन्ते सम्पदस्सर्वाः नश्यन्ति सकला गदाः ॥६॥

विशेषतो महारोगभीतानां परमौषधम् ।
यक्ष्मापस्मारकुष्ठाद्या अनिवार्या महौषधैः ॥७॥

अमुष्य पठनादष्टषष्टिकृत्वो विधानतः ।
प्रणश्यन्ते नसन्देहः श्रीरामकरुणावशात् ॥८॥

अत्राप्युदाहरन्तीम मितिहासं पुरातनम् ।
काण्डस्य सुन्दराख्यस्य महिमप्रतिपादकम् ॥९॥

शृणु वक्ष्यामि तं तेऽद्य महत्या श्रद्धया युता ।
अस्ति काञ्चीपुरं नाम महीमण्डलमण्डनम् ॥१०॥

राजानश्चोळदेशेशा वसन्त्यत्र मनोहरे ।
वंशाङ्कुराभिधो राजा तत्रासीदतिधार्मिकः ॥११॥

मनोरमाख्यया पत्न्या यायजूकस्सतां गतिः ।
त्वदंशमूर्तेः कामाक्ष्याः द्विभुजायाः पदाम्बुजे ॥१२॥

एकाम्रनाथाभिख्यस्य ममचाप्यतिभक्तिमान् ।
मदावळाचलेशस्य वरदाख्याजुषो हरेः ॥१३॥

भुक्तिमुक्तिप्रदायां हि सेवायामतितत्परः ।
एकएवेश्वरोभिन्न स्त्रिधेति विदुषां वचः ॥१४॥

श्रद्दधानो जगत्सर्वं भावयन्नीश्वरात्मकम् ।

सामन्तनृपकोटीरमणिभास्यपदाम्बुजः ॥१५॥

अनङ्ग इव रूपेण तेजसा वसुमानिव ।
शशास भूतलं सर्वं धर्ममाश्रित्य केवलम् ॥१६॥

तस्य सर्वसमृद्धस्याप्यपत्याभावतो हृदि ।
शोको लग्नश्शङ्कुरिव व्यथयामास भूपतिम् ॥१७॥

ईजेऽश्वमेधैर्बहुभिः पुत्रार्थं भूरिदक्षिणैः ।
त्वां च मां चापि वरदं महाविभवविस्तरैः ॥१८॥

आराधयामास चिरं बहून् विप्रानभोजयत् ।
एकदा सतु कामाक्ष्या निर्गच्छन्नालयाद्बहिः ॥१९॥

ददर्श योगिनं कञ्चित् ध्यानयोगनिरन्तरम् ।
तं विलोक्याभवद्भीतः प्रभाकरमिवौजसा ॥२०॥

अपसृत्य क्षणं स्थित्वोन्मीलनं प्रत्यपालयत् ।
नेत्रे उन्मीलयामास क्षणात् स च समाधितः ॥२१॥

तं पादयोर्नृपोऽनंसीत् भक्तितो द्विजपुङ्गवम् ।
आत्मानं वेदयामास पृष्टः कोऽसीति तेन च ॥२२॥

योगी—

तुष्टोऽस्मि तव राजेन्द्र भक्त्या मय्यनवद्यया ।
अहैतुक्याऽद्य किं त्वं मे वाञ्छसि प्रियमीरय ॥२३॥

राजोवाच—

धन्योऽस्म्यनुगृहीतोऽस्मि कुलं मे पावनं कृतम् ।
अकिञ्चित्कारिणे मह्यं यद्भवान् परितुष्यति ॥२४॥

भवादृशां प्रसादेन पूर्णः संपद्भिरस्म्यहम् ।
पुत्रो वंशकरो जातो नाद्यावधि मम प्रभो ॥२५॥

तदर्थं बहवो यज्ञाः प्राप्तास्सम्पूर्णदक्षिणाः ।
तर्पिताः पितरोऽर्थिभ्यः दत्तमभ्यर्थिताधिकम् ॥२६॥

मम वंशो मयैवेह संपूर्येतेति दुःखतः ।
रात्रिंदिवं मे तपते मनो बुद्धिश्च मुह्यति ॥२७॥

महेश्वरः—

इत्युक्तस्स महायोगी क्षणं ध्यात्वा प्रसन्नधीः ।
उवाच व्यक्तया वाचा राज्ञः प्रह्लादयन्मनः ॥२८॥

योगी—

राजन् जन्मनि पूर्वस्मिन् त्वमभूर्भूसुरोत्तमः ।
आराधयन् रङ्गनाथं तस्य दीपान् बहून् न्यधाः ॥२९॥

तेन पुण्यप्रभावेन राजाऽभूरद्यजन्मनि ।
किन्तु पूर्वभवे पुत्रीं न्यरुधो निजवेश्मनि ॥३०॥

भर्तारं गन्तुमिच्छन्तीं तप्यन्ती मन्तरेव तु ।
जामात्रा कलहं कुर्वन् पुत्रेच्छुं कामपीडिताम् ॥३१॥

तेन शोकेन महता सा ह्यपुत्रैव संस्थिता ।
तेन पापेन पुत्रस्ते न जातोऽस्मिंस्तु जन्मनि ॥३२॥

प्रायश्चित्तं न पश्यामि तादृशस्य महैनसः ।
तथाऽपि वक्ष्याम्यालोच्य सूक्ष्मेण तु समाधिना ॥३३॥

आसाद्याखण्डकावेरीं दारुकावनमादितः ।

भवानीसङ्गमो यावत् तीरयोरुभयोरपि ॥३४॥

स्थित्वा शैवेषु क्षेत्रेषु वैष्णवेष्वपि भक्तितः ।
स्नात्वा ह्यखण्डकावेर्यां प्रातस्सन्ध्यादिकं चरन् ॥३५॥

काले तु सङ्गवे प्राप्ते सङ्कल्प्य विधिपूर्वकम् ।
जन्मान्तरकृतं पापं समुच्चार्य प्रयत्नतः ॥३६॥

ब्राह्मणानभ्यनुज्ञाप्य सुवर्णैरजतैरपि ।
स्नात्वा गोभूहिरण्यादि दत्वा विप्रेभ्य आदरात् ॥३७॥

ब्रह्मचर्यव्रतपर स्सपत्नीक स्सबान्धवः ।
आराधयन् हरिहरौ वर्षमात्रं वसाधुना ॥३८॥

अथ ते भविता पुत्रः सर्वलक्षणसंयुतः ।
इत्युक्त्वा सययौ योगी राज्ञाऽऽतिथ्यायभक्तितः ॥३९॥

प्रार्थ्यमानोऽप्यनुव्रज्य यथेष्टं मौनमास्थितः ।
राजाऽपि योगिवर्यस्य हृदि वाक्यं निधाय च ॥४०॥

यथाऽऽदिष्टं तथा चक्रे महापरिकरान्वितः ।
मनोरमा ततो गर्भमाधत्त विधिगौरवात् ॥४१॥

सुषुवे तनयं दीप्तया दिननाथोपमं सती ।
जातकर्मादिकं कर्म चक्रेऽस्य बहुविस्तरम् ॥४२॥

सच बालोऽथ ववृधे शुक्लपक्षशशाङ्कवत् ।
राजा निमज्जन् हर्षाब्धौ मेने च स्व ममानुषम् ॥४३॥

उपनीय यथाकालं प्रैषयच्च गुरोः कुलम् ।

वेदान् षडङ्गसहितान् धनुर्वेदादिकांस्तथा ॥४४॥
अभ्यस्य बालचन्द्राख्य स्सच राजकुमारकः ।
व्रतं समाप्य न्यवसद्यथाविधि पितुर्गृहे ॥४५॥
वीर्ये विनयसम्पत्तौ विद्यायां वादिनां जये ।
आलोक्यानुपमं तं तु कळिङ्गाधिपतिर्नृपः ॥४६॥
पुत्रीमनङ्गसेनाख्या मनङ्गजयवल्लरीम् ।
वल्लकीवादनपटुं लज्जाविनयभूमिकाम् ॥४७॥
सर्वाङ्गसुन्दरीं तस्मै ददौ संप्रार्थ्य भूषिताम् ।
स तया ज्योत्स्नयेवेन्दुः कुमारश्शुशुभेऽधिकम् ॥४८॥
राज्यकार्याणि सर्वाणि तातं विश्रामयन् स्वयम् ।
प्रजाभिरनुरक्तस्सन् प्रजाप्रीतिकरोऽकरोत् ॥४९॥
एवं गच्छति कालेतु राजा वंशकरो महान् ।
राज्यभारं सुते न्यस्य ऐच्छत् गन्तुं तपोवनम् ॥५०॥
तत्रान्तरे बालचन्द्र स्सन्मार्गे निरतोऽपि च ।
प्राग्भवीयेनांहसाऽभूत् गृहीतो राजयक्ष्मणा ॥५१॥
तथाविधं सुतं वीक्ष्य राजा दुःखार्द्रमानसः ।
भिषग्वरान् समानीय चिकित्सां बहुधाऽकरोत् ॥५२॥
अभोजयल्लक्षसङ्ख्यान् वेदज्ञान् द्विजपुङ्गवान् ।
अददात् गाश्च भूमीश्च सुवर्णं रजतं वसु ॥५३॥
दरिद्रेभ्यो द्विजातिभ्यः तस्य पापस्य शान्तये ।
एकाम्रेशं च कामाक्षीं वरदं चार्तिहारिणम् ॥५४॥

बहुधाऽऽराधयामास अर्चनाभिषवादिभिः ।
रोगश्च ववृधे नित्यं सर्वे दुःखाब्धिमज्जिताः ॥५५॥

असहिष्णुरिदं दुःखं राजा प्रायोपवेशने ।
मतिं चकार विन्यस्य राज्यं मन्त्रिषु सत्तमः ॥५६॥

तत्रान्तरे समागच्छत् स योगी ज्ञानिनां वरः ।
तस्मिन्नेव तु कामाक्ष्याः देशे दिव्यालयस्य च ॥५७॥

देवीं प्रणम्य निर्गच्छन् राजा वंशकरोऽपि सः ।
तं दृष्ट्वा योगिनां वर्यं हर्षं मानातिगं ययौ ॥५८॥

स प्रणम्य महात्मानं शतकृत्वः पुनःपुनः ।
पृष्टश्च कुशलं तेन रुदन् वचनमब्रवीत् ॥५९॥

राजा—

भगवन् सर्वभावज्ञ श्रितकल्पतरो महन् ।
श्रीमतां विदितादन्यत् किं ब्रूयां कुशलं मम ॥६०॥

भवत्प्रसादाज्जातोमे पुत्रस्सर्वाङ्गसुन्दरः ।
विद्यावान् वीर्यवान् हीमान् युवा धन्वी च जातवान् ॥

तस्मिन् भारं समावेश्य सर्वभारवहक्षमे ।
तपोवनं गन्तुमिच्छुर्यदाऽभूवं कृतत्वरः ॥६२॥

तदा यदृच्छयैवासौ गृहीतो राजयक्ष्मणा ।
बहुप्रकारा विहिता चिकित्सा च भिषग्वरैः ॥६३॥

देवताराधनं चापि कृतं बहुविधं मया ।
रोगश्च कम्पयंश्चेतो वर्धते च दिनेदिने ॥६४॥

उद्यतोऽहं महादुःखात् कर्तुं प्रायोपवेशनम् ।
तदन्तरेऽत्र भवतां दर्शनं प्राप्य हृष्टधीः ॥६५॥

अविन्दं शरणं श्रीमत् पदाब्जं दुःखनुत्तये ।
आज्ञा यथा स्यात् भवतां तथा कर्तास्मि नान्यथा ॥

योगी—

पूर्वमेव हि ते दुःखमिदं सन्दृष्टमेव मे ।
जन्मान्तरे तव सुतः ब्राह्मणानां तपस्विनाम् ॥६७॥

आर्जितं रामपूजार्थं अपाहरदसम्मतः ।
तेन स्वं पोषयन् देहं ननर्त मदविह्वलः ॥६८॥

संवत्सरमविच्छिन्नं रामायणकथाश्रवात् ।
रामपूजादर्शनेन पूजोपकरणार्जनैः ॥६९॥

पुष्पाद्याहरणैर्नित्यं अद्यते पुत्रतां गतः ।
रामद्रव्यापहारेण यक्ष्मणाऽभूच्च पीडितः ॥७०॥

तत्पापपरिहारार्थं क्रियां वक्ष्यामि तां कुरु ।

राजा—

महाननुग्रहोऽयं मे यदि वक्ष्यसि तां क्रियाम् ॥७१॥

सुलभां कष्टसाध्यां वा कर्तुं सज्जोऽस्मि सर्वथा ।
मम पूर्वैः पुण्यपुञ्जैः श्रीमतां करुणा मयि ॥७२॥

योगी—

शृणु वक्ष्यामि राजेन्द्र यथोक्तं संविधत्स्व च ।
निर्माय मण्टपं दिव्यं कदलीनारिकेळकैः ॥७३॥

मुक्ताद्यैश्च वितानेनाप्यलङ्कृत्य यथाविधि ।
निर्माय वेदिकां तत्र चतुरश्रां मनोरमाम् ॥७४॥

अहतेनच पट्टेन शुक्लेनाच्छाद्य तां पुनः ।
व्रीहीन् षट्प्रस्थमात्रान्वै तत्रादौ सन्निवेश्य च ॥७५॥

तदर्धान् तण्डुलान् शुभ्रान् क्षिप्त्वा तदुपरि क्रमात् ।
अष्टादशपलस्वर्णनिर्मिते विस्तृतास्यके ॥७६॥

मौक्तिकानि समापूर्य पात्रे तत्स्वर्णपट्टतः ।
आच्छाद्य तत्रच पलस्वर्णनिर्मितपट्टके ॥७७॥

लिखित्वा श्रीरामयन्त्रं नवावरणसंयुतम् ।
यथाविधि प्रतिष्ठाप्य पूजयित्वा यथाविधि ॥ ॥७८॥

हैमीं कृत्वाऽत्र प्रतिमां सीतारामाञ्जनेयकाम् ।
अर्चयित्वा रामनामसहस्रेणाम्बुजैर्वरैः ॥७९॥

तुलस्या मल्लिकाभिर्वा चम्पकैः केतकीदलैः ।
तत्सन्निधौ प्रयतहृत् श्रीमद्रामायणोदितम् ॥८०॥

काण्डं श्रीसुन्दराभिख्यं पठेदव्यग्रमानसः ।
प्रातर्मुहूर्तात्परतः समारभ्य प्रसन्नधीः ॥८१॥

सूर्ये गते व्योममध्यं विरमेत् पाठतोऽमुतः ।
पठेदनुदिनं चाष्टषष्टिकृत्वो यथा भवेत् ॥८२॥

अखण्डदीपं प्रज्वाल्य घृतवर्तिसमन्वितम् ।
श्रोतारं कल्पयित्वा च भक्तं श्रीरामपादयोः ॥८३॥

पूजयेच्च पुना रामं पाठान्तेऽपूपपायसैः ।

समाप्य प्रथमावृत्तिं विप्रान् द्वादश पूजयेत् ॥८४॥
अथ द्वितीयावृत्त्यादि समाप्तौ श्रद्धया द्विजान् ।
एकैकाधिकसङ्ख्याकान् भोजयेन्मधुपायसैः ॥८५॥
अष्टषष्टिदिनैरष्टषष्टिरावृत्तयो यदि ।
श्रीमत्सुन्दरकाण्डस्य समाप्येरन् तदुत्तमम् ॥८६॥
यदि मासैश्चतुर्भिस्तु समाप्येताथ मध्यमम् ।
षड्भिर्मासैस्समाप्येत यदि स्यादधमं स्मृतम् ॥८७॥
उत्तमं तत्स्मृतं यत्तु यजमानः स्वयं पठेत् ।
विप्रद्वारा मध्यमं स्यात् पठेयुर्बहवो यदि ॥८८॥
अधमं तत्तु संप्रोक्तं पाठस्य क्रम ईरितः ।
अष्टषष्टितमावृत्तौ समाप्तायां यथाक्रमम् ॥८९॥
पठित्वा युद्धकाण्डञ्च पञ्चभिष्षड्भिरेव वा ।
दिनैः पट्टाभिषेकाख्यं रामस्योत्सवमाचरेत् ॥९०॥
अष्टषष्टितमावृत्तौ आरब्धायां यथाक्रमम् ।
आयुद्धकाण्डसम्पूर्ति सायङ्काले दिनेदिने ॥९१॥
पूर्वाह्णपठितान् सर्गान् भक्तिपूर्वं प्रवाचयेत् ।
वक्तारं कल्पयित्वाऽथ सर्वशास्त्रार्थपारगम् ॥९२॥
श्रीरामभक्तिनिरतं पूजयित्वा द्विजोत्तमम् ।
शृणुयाद्रामचरितस्यार्थान् रस्याननुत्तमान् ॥९३॥
एवमस्मिन् व्रते चीर्णे प्रसीदति रघूत्तमः ।
अश्विभ्यामपि ये रोगा असाध्यास्स्युर्निवारणे ॥९४॥

ते सद्यो नाशमेष्यन्ति दीर्घमायुश्च विन्दते ।
विरोधः पुत्रमित्राद्यैरानुकूल्येन शाम्यति ॥९५॥

कुटुम्बकलहोजीर्यत्यपमृत्युश्च नश्यति ।
ऋणबाधा प्रशाम्येच्च शत्रूणां च जयो भवेत् ॥९६॥

बहुना किमिहोक्तेन सर्वास्सिध्यन्ति सिद्धयः ।
व्रतमेतच्चाष्टषष्टिकृत्वो यस्त्वाचरिष्यति ॥९७॥

भवेयुर्वशगास्तस्य अणिमाद्यष्टसिद्धयः ।
वैराग्यवान् व्रतमिदं भक्त्या यद्याचरिष्यति ॥९८॥

तं सुग्रीवमिव प्रीत्या राघवस्संलपिष्यति ।
एवं कुरु यथादिष्टं राजन् वंशाङ्कुराधुना ॥९९॥

अचिरात्तव पुत्रस्य रोगोऽयं नाशमेष्यति ।

महेश्वरः–

इत्युक्त्वा स ययौ योगी नज्ञातः केनचित्ततः ॥१००॥

राजाऽपि भक्तिपूर्वन्तु व्रतमेतत्समाचरत् ।
यथोक्तेनैव विधिना नकिञ्चित् पर्यहीयत ॥१०१॥

बालचन्द्रः स्वयं श्रीमत् काण्डं सुन्दरसंज्ञकम् ।
पठतिस्म प्रयत्नेन पुरोधाः पूजनं व्यधात् ॥१०२॥

प्राप्ते रामस्य पट्टाभिषेके तु पृथिवीपतिः ।
महोत्सवं समातेने महाविभवविस्तरैः ॥१०३॥

असङ्ख्यातसहस्राणि विप्राणामप्यभोजयत् ।
वक्तारं बहु सम्मान्य कनकैरभ्यषेचयत् ॥१०४॥

एवं कृतव्रतस्तस्य राज्ञः पुत्रस्य धीमतः ।
क्रमेण रोगश्शान्तोऽभूत् ययावुल्लाघतां च सः ॥१०५॥

एवं देवि सकृद्द्वाऽष्टषष्टिकृत्वः प्रपाठने ।
फलं दृष्टचरं सर्वैः ततोऽन्यत्र बहुत्र च ॥१०६॥

एवं व्रतेन चीर्णेन वन्ध्या बह्व्योऽपि योषितः ।
पुत्रपूर्णोत्सङ्गतला जाता रामप्रसादतः ॥१०७॥

तत्स्मात्सर्वप्रयत्नेन दरिद्रेणापि देहिना ।
यथाशक्ति व्ययं कृत्वा कार्यमेतद्व्रतं महत् ॥१०८॥

वक्तृत्वे पठितृत्वेच द्विज एवाधिकारवान् ।
श्रवणेऽधिकृतास्सर्वे वर्णाश्चत्वार एव च ॥१०९॥

शूद्रैर्देवालये कार्यं मन्यैर्द्विजगृहेऽपि वा ।
देवालये वा सङ्कल्प्य चरितव्यमिदं व्रतम् ॥११०॥

किमुक्तेनेह बहुना व्रतमेतत्कलौ नृणाम् ।
अर्पणे सर्वकामानां कल्पवृक्षायते ध्रुवम् ॥१११॥

पुनर्वक्ष्यामि गिरिजे शृणु त्वमवधानतः ।
एवं कर्तुमशक्तानां विधानानि बहूनि च ॥११२॥

सन्ति तान्यद्य वक्ष्यामि लोकानां हितकाम्यया ।
पठेत्द्वात्रिंशदावृत्ति काण्डं श्रीसुन्दराभिधम् ॥११३॥

चूडामणिप्रदानान्तं प्रथमे दिवसे पठेत् ।
काण्डसंपूर्तिपर्यन्तं द्वितीये दिवसे पठेत् ॥११४॥

एवं द्वात्रिंशदावृत्ति चतुष्षष्टया दिनैः पठेत् ।

चतुर्विंशतिकृत्वो वा द्वासप्ततिदिनैः पठेत् ॥११५॥

सीतादर्शनसर्गान्तं प्रथमे दिवसे पठेत् ।
द्वितीयेऽशोकवनिकाभङ्गान्तं प्रयतः पठेत् ॥११६॥

तृतीये दिवसे काण्डं पठित्वा पूरयेत्सुधीः ।
एवं द्वासप्ततिदिनैः व्रतमेतत्समापयेत् ॥११७॥

अष्टाचत्वारिंशदह्ना द्वादशावृत्ति वा पठेत् ।
सीतादर्शनसर्गान्तं प्रथमे दिवसे पठेत् ॥११८॥

सोऽवतीर्येति सर्गात्प्राक् द्वितीये विरमेद्दिने ।
हनूमदुपदेशान्तं रावणाय तृतीयके ॥११९॥

शेषं चतुर्थे काण्डस्य दिवसे संपठेत्सुधीः ।
अष्टाचत्वारिंशतैवं दिनैर्व्रतमिदं चरेत् ॥१२०॥

सप्तकृत्वोऽथवा काण्डमष्टषष्ट्या दिनैः पठेत् ।
दिनेदिने पठेत् सर्गान् सप्तैव विधिपूर्वकम् ॥१२१॥

अष्टषष्टितमे काण्डं पूर्णं स्यात् सप्तसर्गतः ।
चतुरावृत्तिर्वा पाठ्यम् अष्टाविंशतिवासरैः ॥१२२॥

प्रत्यहं पठितव्यास्स्युर्दश सर्गा विधानतः ।
अष्टविंशे दिने काण्डं पूरयेत् शिष्टसर्गतः ॥१२३॥

अथवा तु द्विरावृत्ति पठेत् काण्डं प्रयत्नतः ।
दिनैश्च सप्तदशभिः प्रत्यहं चाष्टसर्गतः ॥१२४॥

एषु कल्पेषु सर्वेषु समाप्तिदिवसे प्रभोः ।
राज्यपट्टाभिषेकाख्यं पठेत् सर्गं प्रयत्नतः ॥१२५॥

यथाविभवमर्यादं कारयेदुत्सवं तथा ।
प्रत्यहं पठनात् पूर्वं परं च विनिवेदयेत् ॥१२६॥

पयस्सशर्करं तप्तं तांबूलं च फलानि च ।
भोज्या विप्रा यथाशक्ति समाप्तौ द्विगुणं भवेत् ॥

सर्वथा यस्त्वशक्तस्स्यादेषु कल्पेषु भूसुरः ।
सकृत् सुन्दरकाण्डं तु पठेत् प्रयतमानसः ॥१२८॥

एकाह्ना यः पठेत् प्रातस्समारभ्यापराह्णतः ।
प्रागेव पूरयेत्काण्ड मव्यग्रपदमुच्चकैः ॥१२९॥

तस्य पुण्यफलं वक्तुं नैव शेषोऽपि शक्नुयात् ।
तत्राप्यशक्तो द्विदिनं पठेत् कांक्षितसिद्धये ॥१३०॥

अङ्गुळीयकदानात् प्रागाद्येऽहनि विरामयेत् ।
समापयेत् द्वितीयेऽह्नि फलं तस्याप्यनन्तकम् ॥१३१॥

अथवाऽऽद्येतु दिवसे पठेदास्वप्नदर्शनम् ।
द्वितीयेऽशोकवनिकाभङ्गात् प्राग्विरमेत् सुधीः ॥१३२॥

तृतीये पूरयेत् काण्डं विधिरेषह्यनुत्तमः ।
एवं त्रिषु दिनेष्वेव महत्पारायणे फलम् ॥१३३॥

अथवाऽऽद्ये हनुमताऽऽसीतादर्शनतः पठेत् ।
द्वितीये त्रिजटास्वप्नकथनान्तं पठेद्दिने ॥१३४॥

चूडामणिप्रदानान्तं तृतीये दिवसे पठेत् ।
लङ्कादाहान्तमेव स्याच्चतुर्थे पठनं दिने ॥१३५॥

पञ्चमे पूरयेत्काण्डं इति पञ्चदिनैर्विधिः ।

पठेद्वा प्रत्यहं सर्गान् समारभ्य भृगोर्दिने ॥१३६॥

नवैव पुनरावृत्ते भृगोर्वारेऽवशेषितान् ।
पञ्च सर्गान् पठित्वैव पठेत् पट्टाभिषेचनम् ॥१३७॥

एवमष्टदिनैरेष विधिः श्रीकामिनां वरः ।
प्रथमे पञ्च पाठ्यास्स्युर्द्वितीये सर्गका दश ॥१३८॥

तृतीये पञ्च षट्तुर्ये सप्तसर्गास्तु पञ्चमे ।
षष्ठेतु सप्तसर्गास्स्युस्सप्तमे द्वादशैव तु ॥१३९॥

अष्टमेऽष्ट दिने पाठ्याः नवमे चाष्टसर्गकाः ।
विधिरेष महान् प्रोक्तो नवभिर्दिवसैः कृतः ॥१४०॥

निवेदयेत् शर्करान्नं घृताक्तं प्रथमे दिने ।
अपूपान् पायसं चापि द्वितीये विनिवेदयेत् ॥१४१॥

तृतीयेतु तिलान्नं स्यात् चतुर्थे शष्कुलीद्वयम् ।
दध्यन्नं पञ्चमे दद्यात् षष्ठे दद्यात्तु मोदकान् ॥१४२॥

नानाविधफलान्येव दद्यात् घस्रेतु सप्तमे ।
सूपान्नमष्टमे दद्यात् नवमे ससितं पयः ॥१४३॥

अस्मिन् व्रते प्रवचनं कृतं चेदुत्तमोत्तमम् ।
व्रतमन्यत्प्रवक्ष्यामि शृणु पार्वति कामदम् ॥१४४॥

दिनेदिने तु षट्सर्गाः दिनैकादशकं पठेत् ।
द्वादशे शिष्टसर्गौ द्वौ पठित्वा भक्तिपूर्वकम् ॥१४५॥

विभीषणाभयकरं ततस्सर्गद्वयं पठेत् ।
रावणेः कुंभकर्णस्य रावणस्य वधाश्रयम् ॥१४६॥

ततस्सर्गत्रयं पाठ्यं ततो रामाभिषेचनम्।
दिनैरेवं द्वादशभिर्व्रतमेतदनुत्तमम् ॥१४७॥

आचरन्नर्चयेद्रामं नाम्नां साहस्रतोऽन्वहम्।
रात्रौतु प्रथमे यामे कृतं प्रवचनं यदि ॥१४८॥

महाफलं व्रतमिदं ह्यनुमन्येत राघवः।
प्रत्यहं द्वौ पठेत् सर्गौ द्वाविंशत्या तु वासरैः ॥१४९॥

त्रयोविंशे पञ्च सर्गान् चतुर्विंशेतु त्रीन् पठेत्।
पञ्चविंशे तु षट् पाठ्याः षड्विंशे त्रयएव च ॥१५०॥

सप्तविंशेतु चत्वारः प्राप्तेऽष्टाविंशके दिने।
अवशिष्टान् पठित्वा त्रीन् दशाननवधं ततः ॥१५१॥

पट्टाभिषेकं कुर्यात्तु यथाविभवविस्तरम्।
एषु सर्वेषु कल्पेषु यद्यशक्तो यथासुखम् ॥१५२॥

पठित्वा रचयेद्रामपट्टाभिषवमुत्सवम्।
मुमुक्षुर्भवपाथोधिं तरितुं यदि वाञ्छति ॥१५३॥

पठेत्तु प्रथमं सर्गं प्रातरेव ऋतुत्रयम्।
भूतवेताळकूश्माण्डपिशाचादिग्रहैः कृताम् ॥१५४॥

पीडामपानुदन् लङ्काविजयं सर्गमापठेत्।
बुद्धिमान्द्यमपाकर्तुं हनुमच्चिन्तनं पठेत् ॥१५५॥

पारदारिकतादोषशान्तये हनुमत्कृतम्।
रावणान्तःपुरे सीताऽन्वेषणं प्रयतः पठेत् ॥१५६॥

सीतादर्शनसर्गन्तु वायुपुत्रेण यः पठेत्।

कुबेरइव नित्यश्रीर्भूत्वा मोदेत भूतले ॥१५७॥

पठेत्तु त्रिजटास्वप्नं दुःस्वप्नापन्निवृत्तये ।
सत्याभिवृद्धिकामस्तु सीताया रावणस्य च ॥१५८॥

पठेत् सर्गद्वयं वादं भारं न्यस्य रघूत्तमे ।
विश्लिष्टबन्धुभिस्सार्द्धं पुनस्संयोगमिच्छता ॥१५९॥

सीताहनुमतोस्सर्गाः पाठ्यास्संवादकात्मकाः ।
अङ्गुळीयार्पणं सर्गं पठेदापत्प्रशान्तये ॥१६०॥

मत्याऽमत्या च रामस्य कृतानां विविधागसाम् ।
प्रशान्तये पठेत् सर्गं काकानुग्रहकारकम् ॥१६१॥

आनन्दरूपब्रह्मत्वप्रेप्सुता यदि चेन्नृणाम् ।
चूडामणिप्रदानाख्यः पाठ्यस्सर्गो हनूमते ॥१६२॥

शत्रूणां जयकामस्तु रक्षसां हनुमत्कृतम् ।
निधनं किंकरादीनां प्रयतः प्रपठेत्प्रगे ॥१६३॥

धर्माभिवृद्धिकामास्तु रावणाय हनूमता ।
सन्देशकथनं धर्म्यं पठेयुर्भक्तिपूर्वकम् ॥१६४॥

गृहारामादिवृद्ध्यर्थं लङ्कादाहं पठेद्यतः ।
पठेन्मधुवनध्वंसं वानरैः कृतमादरात् ॥१६५॥

क्षुत्पिपासातिगो ब्रह्मलोके शान्तस्सुखं वसेत् ।
रामाय हनुमत्प्रोक्तं सीतासन्देशमादृतः ॥१६६॥

पठन्नामरणं भुक्तिमुक्ती रामात् प्रपद्यते ।
अशोकवनिकाभङ्गं पठित्वा चिन्तितार्थभाक् ॥१६७॥

सीतावर्णनसर्गेण पठितेन विरागिणः ।
ज्ञानं ब्रह्मेति निखिलं बीभत्साच भवे भवेत् ॥१६८॥

किं बहूक्तेन गिरिजे यां सिद्धिं पठनान्नरः ।
श्रीमत्सुन्दरकाण्डस्य नलभेत न साऽस्ति हि ॥१६९॥

पुत्रार्थी लभते पुत्रं सप्तकृत्वः प्रपाठनात् ।
लभेत निधिमव्यग्रः सकृदष्टदिनैः पठन् ॥१७०॥

सकृन्नवदिनैः पाठात् कन्येयात् सदृशं वरम् ।
उक्तैरेभिस्सर्वकल्पै रामप्रीतिरनल्पिका ॥१७१॥

मोक्षान्तसिद्धिदा जाता किं नकुर्यात् सुखं भुवि ।
सकृदेकदिने पाठस्तारयेत्तु महापदः ॥१७२॥

यं यं कामं हृदाऽऽचिन्त्य पाठव्रतमुपाचरेत् ।
तंतं हस्तस्थितमिव गणयेद्व्रतवान् पुमान् ॥१७३॥

सर्वे रोगाः प्रशाम्यन्ति नश्येत् सकलदुष्कृतम् ।
पूर्वं पश्चाच्च पठनन्नैवेद्यं नकरोति यः ॥१७४॥

तस्य सिद्धिं जायमानां प्रतिबध्नाति मारुतिः ।
स्त्रियश्शूद्राश्च शृणुयुः पाठयित्वा द्विजर्षभैः ॥१७५॥

सर्वेष्वेतेषु कल्पेषु रामं सीतां च मारुतिम् ।
नाम्नां सहस्रतोऽभ्यर्चेत् उत्तमं स्यात्तदा व्रतम् ॥१७६॥

अशक्तोऽष्टोत्तरशतेनार्चयेत्तत्तु मध्यमम् ।
गव्यं क्षीरं शर्कराढ्यं सुतप्तं च सुखोष्णकम् ॥१७७॥

निवेदयेद्राघवाय सर्वप्रतिनिधिस्त्विदम् ।

पद्मानि तुलसीपत्राण्युत्तमानि प्रपूजने ॥१७८॥
तदलाभे यथालाभं पुष्पैरर्चेद्रघूत्तमम् ।
करवीरसुमैः पूजां नकदाऽपि व्रती चरेत् ॥१७९॥
केतकीकुसुमानि स्युरलङ्काराय केवलम् ।
दाडिमीफलनैवेद्यमनर्घफलदायकम् ॥१८०॥
आवाहने विसर्गे वा पूजान्ते वन्दनादिषु ।
पठंस्तु रामगायत्रीं वशयेद्राघवं व्रती ॥१८१॥
पूजासाद्गुण्यसिद्ध्यर्थं सावित्रीं वा षडक्षरीम् ।
जपेद्वा रामगायत्रीं ज्ञाताज्ञाताघशान्तये ॥१८२॥
दशावरणयन्त्रस्थरामपूजोत्तमा स्मृता ।
नवावरणयन्त्रश्चेत् मद्ध्यमं तत्र पूजनम् ॥१८३॥
एतद्यन्त्रद्वयस्यापि सन्निधौ पठनं यदि ।
प्रतिमाकरणे यत्नं निर्बन्धान्नैव कारयेत् ॥१८४॥
असक्तः प्रतिमाक्लृप्तौ यन्त्रस्यापि यदि द्विजः ।
श्रीमद्रामायणग्रन्थे पूजयेद्रघुसत्तमम् ॥१८५॥
तत्र सन्निहितो नित्यं रामस्सपरिवारकः ।
व्रतकाले ब्रह्मचर्यव्रतवान् व्रतवान् भवेत् ॥१८६॥
स्नाताश्शुद्धसमाचारा अशुद्धैस्सङ्गवर्जिताः ।
भवेयुर्यजमानश्च वक्ता श्रोतार एव च ॥१८७॥
एतद्गुह्यं मया प्रोक्तं रहस्यं गिरिनन्दिनि ।
प्रब्रूयात् सनकादिभ्यः नन्द्ययं द्वापरान्तके ॥१८८॥

ते नारदाय सोऽप्यन्यां सर्वं विस्तारयिष्यति ।
यस्त्विदं ते मया प्रोक्तं क्रमं पारायणस्य च ॥१८९॥
श्रीमत्सुन्दरकाण्डस्य पठेद्वा शृणुयाच्च वा ।
स रामे भक्तिमान् भूत्वा सर्वां सिद्धिं निगच्छति ॥

इत्युमासंहितायां सुन्दरकाण्डपारायणक्रमस्संपूर्णः ॥

---

॥ श्रीः ॥

॥ श्रीरामो जयति ॥

## ॥ अथ श्रीरामचन्द्र प्राणप्रतिष्ठाविधिः ॥

अस्यश्री (नवावरण) श्रीरामचन्द्रप्राणप्रतिष्ठामहामंत्रस्य अगस्त्यो भगवानृषिः । गायत्री छन्दः । श्रीरामचन्द्रस्सावरणो देवता । आंबीजं, ह्रींशक्तिः, क्रों कीलकं, (नवावरण) श्रीरामचन्द्रप्रसादेन अस्मिन्बिम्बे(नवांवरणयन्त्रे) श्रीरामसान्निद्ध्यसिद्ध्यर्थेजपे विनियोगः, आं रां अङ्गुष्ठाभ्यां नमः, ह्रीं रीं तर्जनीभ्यां नमः, क्रों रूं मद्ध्यमाभ्यां नमः, आं रैं अनामिकाभ्यां नमः, ह्रीं रौं कनिष्ठिकाभ्यां नमः । क्रों, रः करतलकरपृष्ठाभ्यां नमः, एवं हृदयादिन्यासाः । ध्यानं—रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं कोदंडमिक्षूद्भवमळिगुण मप्यङ्कुशं पञ्च बाणान् । बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

दाशरथाय विद्महे सीतावल्लभाय धीमहि। तन्नोरामः प्रचोदयात्।
इतीमां रामगायत्रीं दशवारं जपित्वा—

वैकुण्ठधाम्नि रमया परिसेव्यमानः
प्राप्यावनिं दशरथात्मजतामुपेत्य ।
यो रावणं निहतवान् युधि वासुदेवः
रामाख्यया स इह सन्निधिमातनोतु ॥

लमित्यादि पञ्चपूजा । अथ दशवारं मूलमन्त्रजपः । आं ह्रीं क्रों, क्रों ह्रीं आं यरलवशषसहों, हंसस्सोहं, सोहंहंसः, अस्य देवदेवस्य भगवतः(नवावरणसहित)श्रीराचन्द्रात्मनः वासुदेवस्य प्राणाः अस्मिन् बिम्बे(यन्त्रे)तेजोमयसान्निद्ध्यरूपास्तिष्ठन्तु । अस्मिन् बिम्बे(यन्त्रे)भगवतः श्रीरामचन्द्रस्य जीवत्वेन व्यवह्रियमाणा तेजःकला तिष्ठतु। अस्मिन्(यन्त्रे)बिम्बे भगवतः (नवावरणसहितस्य) श्रीरामाख्यतारकब्रह्मणः वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राण मनस्त्वक्पाणिपादप्राणापानव्यानोदानसमानाद्याः सर्वे शरीरधर्मास्सुखं चिरं तिष्ठन्तु स्वाहा । असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् । ज्योक्पश्येम सूर्यमुच्चरन्त मनुमते मृळयानः स्वस्ति । इति चन्दनकुङ्कुमलेपनपुरस्सरं पुष्पान्जलिं विन्यस्य । पञ्चदशवारं प्रणवजपं कृत्वा । पूर्वोक्तरामगायत्रीं वामेभूमिसुतेत्यादिश्लोकं च पठित्वा अस्मिन्नवावरणयन्त्रे (बिम्बे) साङ्गं सपरिवारं नवावरणसहितं श्रीरामचन्द्रं आवाहयामि । इत्यावाह्य शर्करान्नं निवेद्य आंरां हृदयायनम इत्याद्युत्तरन्यासं कृत्वा दिग्विमोकं कृत्वा पूर्वोक्तद्ध्यानश्लोकद्वयं पठित्वा आवाहितोभव, स्थापितोभव, सन्निहितोभव,

सन्निरुद्धोभव, अवकुण्ठितोभव। सुप्रीतोभव। सुमुखोभव। सुप्रसन्नोभव। वरदोभव। प्रसीदप्रसीद। स्वामिन् सर्वजगन्नाथ यावदाचन्द्रतारकम्। तावत्त्वं प्रीतिभावेन (बिम्बे) यन्त्रेस्मिन् सन्निधिं कुरु ॥ इति संप्रार्थय ततो यथाशक्ति कल्पोक्तप्रकारेण पुरुषसूक्तविधानेन वा षोडशोपचारपूजां कुर्यात् ॥

इति सर्वं शुभम्।

इति श्रीरामचन्द्रप्राणप्रतिष्ठाविधिः ॥

---

॥ श्रीः ॥

॥ श्रीरामचन्द्रो विजयते ॥

श्रीरामभक्तिकल्पलतायाम्

## ॥ श्रीरामनवमीपूजाविधिः प्रारभ्यते ॥

अगस्त्यः—

अथातः संप्रवक्ष्यामि श्रीरामनवमीदिने ।
पूजां श्रीरामचन्द्रस्य भुक्तिमुक्तिफलप्रदाम् ॥१॥
चैत्रे मासि सिते पक्षे नवम्यामुत्तमे तिथौ ।
पुनर्वसुयुते पुण्ये लग्ने कर्कटकाह्वये ॥
आविर्बभूव कौसल्यागर्भाद्रामाख्यया हरिः ॥२॥
तस्मिन् महापुण्यदिन उपोष्य विधिवन्नरः ।

अर्चयित्वा रघूत्तंसं यावच्छक्त्युपचारतः ॥३॥
रात्रौ जागरणं कृत्वा परेद्युर्यतमानसः ।
ब्राह्मणान् भोजयेद्भक्त्या त्र्यवरान् घृतपायसैः ॥४॥
मद्ध्याह्नव्यापिनी ग्राह्या नवमी रामपूजने ।
दिनद्वये तथा चेत् स्यात् पूर्वविद्धां परित्यजेत् ॥५॥
वक्ष्यमाणप्रकारेण तत्र रामस्य पूजनम् ।
कुर्यात् संपादितद्रव्यः कृतमाद्ध्याह्निकक्रियः ॥६॥
यजमानश्शुचिर्दक्षश्चिन्तान्तरविवर्जितः ।
ध्यायन् रघुकुलोत्तंसं मनसा नित्यकामदम् ॥७॥
स्वारत्नियुग्ममानेन चतुरश्रां मनोरमाम् ।
वेदिं कृत्वा पुष्पमालाचीनांबरवितानिनीम् ॥८॥
नाळिकेराम्रकदळीक्रमुकाद्यैरलङ्कृताम् ।
तत्र व्रीहीन् प्रस्थमानान् प्रसार्य चतुरश्रतः ॥९॥
तदुपर्यपि तावद्भिस्तण्डुलैश्च प्रसारितैः ।
वर्तुलाकारतः पुण्ये वेदिमद्ध्येऽतिशोभिते ॥१०॥
लिखित्वाऽष्टदळं पद्मं तत्र गङ्गादितीर्थतः ।
पूर्णं घटं स्थापयित्वा कुंभकार्यं समाप्य च ॥११॥
आवाह्य वरुणं तत्र सर्वतीर्थाधिदेवताम् ।
पूजयित्वा तत्र बालरामस्य प्रतिमां शुभाम् ॥१२॥
विन्यस्य च कृतां शक्त्या हेम्नावा रजतेन वा ।
कोदण्डंवा शरं वाऽपि यन्त्रं वा हैमराजतम् ॥१३॥

निक्षिप्य सालग्रामं वा दर्भकूर्चमथापि वा ।
आवाह्य तारकं ब्रह्म तत्र श्रीरघुनायकम् ॥१४॥

तद्विष्णोरिति मन्त्रेण रामगायत्रियाऽपि च ।
मूलमन्त्रेणाष्टवारं जप्तेन च यथाक्रमम् ॥१५॥

बृहत्साम्ना च वर्धस्वेत्यृचा चाथ प्रपूजयेत् ।
स्नानकाले पञ्चरुद्रं रुद्राध्यायं च पाठयेत् ॥१६॥

चमकं तैत्तिरीयोपनिषत्प्रश्नत्रयं तथा ।
बार्हस्पत्यानि समानि रौद्राणि च यथाक्रमम् ॥१७॥

रैवतं राजनं ज्येष्ठसामानि च महत्तथा ।
वाचयेत् ब्राह्मणैश्शुद्धैः करणत्रितयेन च ॥१८॥

अगरूत्थं धूपमग्र्यं घृतदीपं प्रकाशयेत् ।
भूषणान्युपवीतं च वस्त्रं च नवमर्पयेत् ॥१९॥

चन्द्रकाश्मीरजयुतं चन्दनं लेपयेद्बहु ।
पायसापूपचणकगुडान्नघृतमोदकैः ॥२०॥

कदळीपनसाद्यैश्च फलै नैवेद्यमाचरेत् ।
नीराजनं ततः कृत्वा पूजामेवं समाप्य च ॥२१॥

तत्सन्निधौ श्रीवाल्मीकिप्रोक्तरामायणान्तरे ।
पठेत् श्रीरामजननं वाचयेदपि तद्गुरुम् ॥२२॥

अथ संतर्पयेद्विप्रान् फलतांबूलदक्षिणैः ।
परेद्युः प्रातरुत्थाय नित्यं कर्म समाप्य च ॥२३॥

पुनस्संपूज्य काकुत्स्थं काले सङ्गवनामके ।

सपत्नीकस्सहसुतः स्नायात् कुंभस्थतीर्थतः ॥२४॥

विप्राय प्रतिमां दद्यात् सालग्रामं गृहे न्यसेत् ।
भोजयेत् ब्राह्मणान् भक्त्या सहस्रं शतमेव वा ॥२५॥

पञ्चाशद्वा चतुर्विंशत्यष्टादश च द्वादश ।
त्रीन्वाऽपि भोजयेद्रामभक्तान् दद्याच्च दक्षिणाम् ॥२६॥

गृह्णीयादाशिषोऽन्ते च पत्नीपुत्रादिसंयुतः ।
अक्षतान् विप्रहस्तेभ्यः प्रेषयेच्च प्रणम्य तान् ॥२७॥

एवं कृते महीपाल क्षीयन्ते पापराशयः ।
कुटुंबवृद्धि स्सन्मार्गैरायाश्चायान्ति कृत्स्नशः ॥२८॥

नदुःखं क्वचिदाप्नोति पश्येत् बालमृतिं नहि ।
सर्वथा तुष्टिमाप्नोति रामः कारुण्यविग्रहः॥
सुतार्थिने सुतान् दद्याद्धनं दद्याद्धनार्थिने ॥२९॥

तत्रायं पूजाक्रमः—

आदौ सङ्कल्पः—सर्वलोकशरण्यस्य साकेतनगर्यां साम्राज्यसिंहासनमधितिष्ठतः वामभागस्थितवैदेहीकटाक्षनिकरात्मकनीलांबुजमालासमासङ्गद्विगुणीकृतकालिमविजित - कादंविनीकस्य दक्षिणभागे सविधस्थितसशिरोऽञ्जलिबन्धसौमित्रिनयनारविन्दपरंपरासमर्चितचरणकमलस्य कदाचिद्रहसिस्थितस्य श्रीरामचन्द्रपरब्रह्मणः सद्योभुक्तिमुक्तिप्रदभगवदाराधनप्रश्नोत्तरत्वेन प्रतिविहितया आज्ञया सर्वज्ञमतेन श्रीमता हनुमता प्रथमं स्वयमनुष्ठाय स्वाश्रितेभ्यस्सनकादिभ्यः भक्तिपूर्वकं भगवदाराधनकालेषु उत्तमोत्तमत्वेन उपदिष्टे

अजन्मनोऽपि भगवतो जन्मदानतस्सद्भिस्सदा महनीये अस्मिन् श्रीरामनवमीपुण्यकाले निर्गुणस्यापि परब्रह्मण उपासकानां कृते सगुणतां तयाच विग्रहादिमत्तां संपादयन्त्या कटाक्षस्यन्दिकरुणावशात् कठोरागसं काकमपि कमपि भगवतः परिरक्षितवत्या स्वभर्तुरासनसमये वामभागतः स्थितिसमये दक्षिणभागतश्च परिलसन्त्या देव्या जानक्या समुपास्यमानस्य भगवतः श्रीरामचन्द्रस्य दिव्यावतारमुख्यकालभूतेऽस्मिन् कटकलग्ने सकृदेव प्रपन्नाय सकलविधैहिकामुष्मिकसुखवितरणनिरतस्यास्य श्रीरामाख्यपरब्रह्मणः प्रसादेन मम चिन्तितसकलमनोरथसिद्ध्यर्थं (1) ............ सिद्ध्यर्थं अगस्त्यसंहितायां अगस्त्येन जनकायोपदिष्टां रीतिमनुसृत्य यथाशक्ति श्रीरामायणस्थितश्रीरामजननसर्गपारायण तदर्थप्रवचन ब्राह्मणोद्देश्यकव्रीहिफलादिदानात्मकाङ्गत्रययुतां श्रीरामचन्द्रपूजां करिष्ये। इति सङ्कल्प्य ॥

वामे दशरथस्याङ्के चीनपीतांबरावृते ।
स्थितं कतिपयप्रोद्यद्दन्तास्यस्मितसुन्दरम् ॥३०॥

नीलजीमूतसच्छायं मणिकिङ्किणिमेखलम् ।
निष्ककण्ठं निराच्छादं बालं लंबालकाननम् ॥३१॥

उदीक्षमाणं तातस्य मुखं प्रेममुदान्वितम् ।
आसज्य दक्षिणं बाहुं लक्ष्मणस्यांसदेशतः ॥३२॥

दक्षिणाङ्कस्थसौमित्रिनयनाब्जाळिमालितम् ।

---

(1) अत्र यदि किञ्चित्काम्यं स्याात्तदुक्तव्यम् ॥

वामे कौसल्यया देव्या दक्षिणे च सुमित्रया ॥३३॥
सेव्यमानं सस्मितया भर्तुस्सविधसंस्थया ।
सनकादिमुनिव्रातैर्धृताञ्जलिभिरादरात् ॥३४॥
आकाशस्थैः स्तूयमानं ध्यायामि रघुनन्दनम् ॥

इति ध्यानम् ॥

रामस्य दक्षिणे भागे रामालोकनतत्परम् ।
ध्यायामि लक्ष्मणं बालं रामवद्भूषिताङ्गकम् ॥३५॥

इति लक्ष्मणध्यानम् ॥

रामस्य पृष्ठतो दिव्यसिंहासनमधिष्ठितम् ।
वीक्षमाणं सुतौ बालौ मुदा विकसिताननम् ॥३६॥
राजलक्षणसंपन्नं ध्यायेद्दशरथं नृपम् ॥

इति दशरथध्यानम् ॥

वामे दशरथस्यास्य पार्श्वे मन्दस्मिताननाम् ।
तिष्ठन्तीं तनयालोकहर्षनिर्भरमानसाम् ॥३७॥
कौसल्यां भावये देवीं लज्जाविनयशोभिनीम् ॥

इति कौसल्याध्यानम् ॥

राज्ञस्तु दक्षिणे पार्श्वे स्थितां विकसिताननाम् ।
ध्यायन्तीं राघवं देवं सुमित्रां भावये हृदा ॥३८॥

इति सुमित्राध्यानम् ॥

रामस्य पार्श्वे वामेतु कैकेयीकटिसंश्रयौ ।
बालौ भरतशत्रुघ्नौ भजे भूषणभूषितौ ॥३९॥

इति भरतशत्रुघ्नध्यानम् ॥

रामस्य पुरतः किञ्चिद्दूरे शीर्षकृताञ्जलिम् ।
आनन्दाश्रुक्लिन्नमुखं सुमन्त्रं मन्त्रिणां वरम् ॥४०॥
तिष्ठन्तं परया प्रीत्या भक्त्या रोमाञ्चिताङ्गकम् ॥

इति सुमन्त्रध्यानम् ॥

आवाहितो रामचन्द्र बालरूप मनोहर ।
एभिर्युक्तः परीवारैर्मूर्तावस्यां प्रतिष्ठितः ।
श्रीरामनवमीपूजां गृहीत्वा वरदो भव ॥४१॥

आवाहनम् ॥ अथ अङ्गदेवताऽऽवाहनम् । तदित्थम् ॥ दक्षिणे लक्ष्मणमावाहयामि ॥ वामे भरतशत्रुघ्नावावाहयामि ॥ पृष्ठतो दशरथचक्रवर्तिनमावाहयामि ॥ राज्ञो वामभागे कौसल्यामावाहयामि ॥ राज्ञो दक्षिणभागे सुमित्रामावाहयामि ॥ रामस्य पुरतस्सुमन्त्रमावाहयामि ॥ (अत्र यत्किञ्चित् फलादिकं गव्यंच निवेदनीयम् ।) पितुरङ्कस्थितोऽपि त्वं ग्रहीतुं मम पूजनम् । एहि राघव संयुक्तः परिवारैरशेषकैः ॥ सिंहैरूढमनर्घं मे रत्नसिंहासनोत्तमम् ॥ सपरिवाराय श्रीरामचन्द्राय नमः आसनं समर्पयामि ॥ सुवर्णपात्रे निक्षिप्ते राम ते पादपङ्कजे । प्रक्षाळ्य गाङ्गतोयेन तज्जलं शिरसा दधे ॥ पादयोः पाद्यम् ॥ सन्तोऽर्घ्यं त्रिषु कालेषु सूर्यमण्डलवासिने । दिशन्ति ते त्वहं साक्षात्तुभ्यमर्घ्यं मुदाऽर्पये ॥ अर्घ्यं ॥ अपोदत्ता मया राम एलोशीरादिवासिताः । आचाम तेन हृदयान्तरस्थेत्तापत्रयं मम ॥ आचमनीयम् ॥ शर्करा घृतमाद्वीकमिश्रं फलरसं प्रभो ॥

गृहीत्वा मधुपर्कं मे तृप्य तृप्येयमप्यहम् ।। स्नानकालेमधुपर्कम् ।। कालिन्दी सरयूगङ्गा गौतमीसह्यजादितः । जलं नीतं वासितंच स्नानाय प्रतिगृह्यताम् ।। शुद्धोदकस्नानम् ।। अभ्यनज्मि शरीरं ते गन्धतैलेन भक्तितः । स्मरिष्यसि च कौसल्यां तेन सुप्रीतमानसः ।। तैलाभ्यङ्गम् ।। अभिषिक्तः कामधेनो र्दुग्धैस्त्वं निर्जरैर्मुहुः। स्नापयेऽहं च गव्येन पश्य तानिव मामपि।। क्षीराभिषेकम्।। मम मन्तुस्मृतेरुष्णं शीतैर्मलयजद्रवैः । अभिषिञ्चामि ते गात्रं शीतोभव मनस्यपि ।। चन्दनाभिषेकम् ।। वस्त्रेणानन्यदत्तेन वासितेन सुगन्धिना । मार्जयामि रघूत्तंस गात्रं ते मृदुना मृदु।। मार्जनम् ।। सुवर्णसूत्रसंस्यूतं सदशं हंसचिह्नितम् । पीतांबरं ददाम्यद्य रामाङ्गाऽऽच्छादनाय ते ।। वस्त्रम् ।। निर्मितं प्रयतैर्विप्रैर्गायत्र्या च प्रतिष्ठितम् । उपवीतं धारयामि गायत्रीं मनसा स्मरन् ।। यज्ञोपवीतम्।। प्रोतानि दीप्रमणिभिः भूषणानि वराण्यहम् । किरीटाङ्गदमुख्यानि तत्तत्स्थाने निवेशये ।। आभरणानि ।। चन्द्रकुङ्कुमयुक्तेन चन्दनेन तवाङ्गकम् । लेपयामि रघूत्तंस सन्ध्याभ्रविजयी भव ।। गन्धान् धारयामि ।। हरिद्राकुङ्कुमोपेतान् अक्षतान् शालितण्डुलान् । गन्धोपर्यर्पये राम अक्षय्या प्रीतिरस्तु ते ।। अक्षतान् ।। नन्दना चैत्ररथतश्चानीतैरतिकोमलैः । काकुत्स्थ कल्पकुसुमैः पूजये त्वां पुमर्थदम् ।। पुष्पाणि समर्पयामि ।।

अथाङ्गपूजा ।। पामराणामपि सुलभाय नमः पादारविन्दे पूजयामि ।। नरकोत्तारकाय + पादनखकान्ति पू ।। संसारविच्छेदकाय + हंसकावळिंपू ।। सनकादिगुरवे + गुल्फौपू।।

ज्योतिर्मयतनवे + जङ्घे पू ॥ जानकीनिलयोत्सङ्गाय + जानुनी पू॥ उरुभक्तिवशीकृताय + ऊरू पू ॥ विराधवधविकटाय + कटिं पू॥ खलान्तकरणपराय + कटिस्थितमणिकिङ्किणिमेखलां पू ॥ पद्मनाभाय + नाभिं पू ॥ पार्श्वस्थितलक्ष्मणाय + पार्श्वे पू ॥ कौसल्योदरसंस्थिताय + उदरं पू ॥ निष्कवक्षसे + वक्षः पू ॥ सीतालिङ्गनसुखिताय + वामबाहुलतां पू ॥ वालिप्रमथनाय + वामकरस्थितकोदण्डं पू ॥ अभयप्रदानव्रताय + दक्षिणकरतलं पू ॥ शिष्टेष्टप्रदाननिरताय + मुष्टिबन्धं पू ॥ दशाननशिरश्छेत्रे + दक्षिणबाहुं पू ॥ दळिताशरसैनिकाय + दक्षिणकरस्थितशरं पू ॥ चिदेकरसरूपाय + उपदेशकालिकचिन्मुद्रां पू ॥ उत्कण्ठाविवर्जिताय + कण्ठं पू ॥ आकर्णितस्वचरिताय + कर्णौ पू ॥ भक्तमानसावासाय + नासां पू ॥ विकलीकृतदशमुखाय + मुखं पू ॥ विश्वामित्रतपःफलाय + फालं पू ॥ त्रिलोचनगृहीतनाम्ने + लोचने पू । वायव्यास्त्राहतराक्षसाय + कटाक्षान् पू॥ भूपालीकृतस्वपदाश्रितपादुकाय + कपोलौ पू ॥ लोचनविजितकमलच्छदाय + रदनच्छदौ पू ॥ चन्द्रकान्ताननाय + दन्तान् पू ॥ अगस्त्यार्पितस्वशरासनाय + रसनां पूज ॥ अखण्डभूमण्डलाधिपतये + कर्णस्थितकुण्डले पू ॥ सफलीकृतशरभङ्गतपसे नमः शिरः पू॥ करीन्द्रकरबाहवे + किरीटं पू॥ पतिनिकटस्थापितमातृकाय + धर्मप्रवर्तकतां पू ॥ असन्निहितकठादिप्रतिपादितमहाधनाय + अर्थदानप्रवीणतां पू॥ क्षान्तसुग्रीवापराधाय + कामभोगाभ्यनुज्ञां पू ॥ जटायुर्दत्तपरमपदाय + मोक्षप्रदानपरतां पू ॥ विभीषणार्पितराक्षसराज्याय नमः अलुब्धतां पूज॥

शबरीदत्तब्रह्मलोकाय नमः सुखाराद्ध्यतां पू ॥ रक्षितकाकाय + निरवधिककारुण्यं पू ॥ सुग्रीवमित्राय + दीनशरण्यतां पू ॥ आलिङ्गितनिषादाय + अतिमानुषसौलभ्यं पू ॥ मुनिजनमोहन-विग्रहाय + पुंसामपिमोहनसौन्दर्यं पू ॥ पदातीकृतरावणाय + महत्तरपराक्रमं पू ॥ सीतावियोगकृतविलपिताय + मानुषभावा-नुवर्तनं पू । तमसातटवञ्चितपुरजनाय + मायां पू ॥ समा-हितभरताय + धर्मवश्यतां पू॥ अहल्यापावनपादरजसे + पतित-पावनसामर्थ्यं पू ॥ पर्वसुधाकरवदनाय नमः सर्वाण्यङ्गानि सर्वं च गुणसमूहं पूजयामि ॥

अथ धूपदीपादिनीराजनान्तानुपचारान् वैदिकमन्त्रैः कुर्यात् ॥

ऋषिभिर्मन्त्रतंत्रज्ञैः कल्पवृक्षोद्भवैस्सुमैः । अर्चितायाशराराते मन्त्रपुष्पं ददामि ते ॥ मन्त्रपुष्पं ॥ प्रदक्षिणीकृतं सर्वं त्वत्प्रदक्षिणकारिणा । सर्वेलोकाश्च वेदाश्च यद्वसन्ति तवाङ्के ॥ प्रदक्षिणचतुष्टयम् ॥

वन्दे राघवमिन्द्रनीलवपुषं वन्दे महीवल्लभं
वन्दे भूमिसुतामुखाब्जमधुपं वन्दे विरिञ्चस्तुतम् ।
वन्दे मुक्तजनेड्यपादकमलं वन्दे ससौमित्रिकं
वन्दे राक्षसबृन्दखण्डनकरं वन्देच भक्तेष्टदम् ॥

नमस्कारान् ॥

(अत्र दशकृत्वो मालामन्त्रोच्चारणपुरस्सरं
भगवान् नमस्कार्य इति सतां संप्रदायः ।)

कौसल्यया लाल्यमानो मन्दहासोज्वलन्मुखः ।
सर्वाङ्गभूषणो राम नित्यं मे मानसे चर ॥ प्रार्थना ॥

ज्ञात्वा विधीन् निषेधांश्च पापे मे रमते मनः ।
तदर्थं मन्यसे चेन्मां शिक्षितुं राम शास्त्रतः ॥

आकल्पं मे न निस्तारः काऽन्या गतिरिहास्ति मे ॥
तत्त्वां प्रपद्ये शरणं विना दुःखं सुखाप्तये ॥

काकापराधान् क्षन्तासि ततोऽहं धैर्यमाश्रये ।
अदातुं दातुमपि मे दत्तान् नाशयितुं तथा ॥

नरकानीश्वरोऽसि त्वं तन्मे क्षान्त्वाऽऽगसां गणम् ।
सुखं देहि मुदं देहि देहि चारोग्यमव्ययम् ॥

अपमृत्युं हर क्षिप्रं आयुर्मे वर्धयोत्तरम् ।
तवांघ्रियुगळे भक्तिमनिवार्यां पृथग्जनैः ॥

दत्वा जगदिदं सर्वं त्वमेवेति धियं तथा ।
ज्योतीरूपं त्वदीयं मे भावयित्वा हृदम्बुजे ॥

आनन्दरूपं सायुज्यं शरीरान्ते च देहि मे ।
(1) अगस्त्यभाषितं श्रुत्वा त्वामेव सततं श्रये ॥

---

(1) तथाह्यगस्त्यो रामं प्रति—

मुहूर्तमपि राम त्वां ये च पश्यन्ति केचन ।
पाविताः स्वर्गभूताश्च पूज्यास्ते सर्वदैवतैः ॥

ये च त्वां घोरचक्षुर्भिः पश्यन्ति प्राणिनो भुवि ।
हतास्ते यमदण्डेन सद्यो निरयगामिनः ॥

कृतेऽप्यारःधनेऽमुष्मिन् सहस्रागांसि सर्वथा ।
मत्पुत्रपौत्रानप्येवं रक्ष राम नमोऽस्तु ते ॥
इत्यपराधक्षमापणम् ॥

(अथोपविश्य पूजासाद्गुण्यसिद्ध्यर्थं मूलमन्त्रजपः कार्यः ।)

मुक्ताजालं सितच्छत्रं पूर्णेन्दुसदृशं प्रभो ।
धरामि ते पृष्ठगोऽहं स्वीकुरुष्व प्रसादतः ॥ छत्रम् ॥

भरतः पादुके दत्वा राज्यार्थं पुनरग्रहीत् ।
अपुनर्ग्रहणायाहं ददे ते रत्नपादुके ॥ पादुके ॥

चामरैर्वीज्यसे नित्यं चक्रवर्तीति राघव ।
तदहं त्वां तु संवीक्ष्य वीजयेऽहं च चामरैः ॥
चामरवीजनम् ॥

वैकुण्ठाद्वाऽप्ययोद्ध्यातः मत्सन्निधिमुपेयुषः ।
अपाकर्तुं तत्र स्वेदं वीजये व्यजनेन च ॥ व्यजनम् ॥

त्वां महाराज सेवन्ते सूता वैताळिका अपि ।
गायाम्यहं च मधुरं स्तोत्रं ते शृणु राघव ॥ गीतम् ॥

(अत्र कांभोजीयरागस्सांप्रदायिकः ।)

देवदुन्दुभयो नेदुः पुष्पवृष्ट्या समं प्रभो ।

---

ईदृशस्त्वं रघुश्रेष्ठ पावनस्सर्वदेहिनाम् ।
भुवि त्वां कथयन्तोऽपि सिद्धिमेष्यन्ति राघव ॥

प्रशाधि राज्यं धर्मेण गतिर्हि जगतो भवान् ॥
इत्युत्तर श्रीरामायणे ८२ - सर्गे ॥

अयोद्ध्यायां वीक्ष्य जातं वाद्यैस्त्वाऽहं च तोषये ॥

वाद्यम् ॥

आन्दोळिकां मया दत्तामारुह्य रघुनन्दन ।
कौसल्यया चाल्यमानां स्मर डोलां तु शैशवे ॥

आन्दोळिकाम् ॥

सिन्धुदेशोद्भवं राम चन्द्रमण्डलसन्निभम् ।
आरुह्याश्वं मया दत्त माखेटं व्रज राघव ॥

अश्वारोहणम् ॥

महागजे मया दत्ते कुथाऽऽस्तरणशोभिते ।
छत्रचामरसंयुक्तं सिंहासनमलंकुरु ॥ गजाऽऽरोहणम् ॥

गरुडानिलवेगैस्ते रथमश्वैरलङ्कृतम् ।
अहं ददामि सौवर्णं आरुह्यैनं रिपून् जय ॥ रथम् ॥

चण्डकोदण्डहस्तोऽपि हन्तुं कामादिकान् रिपून् ।
न शक्नोपि ममातस्ते हैमं कोदण्डमर्पये ॥ कोदण्डम् ॥

देव देवोत्तमोऽपि त्वं राजराजोत्तमोऽभवः ।
ददे देवोपचारांस्ते सह राजोपचारकैः ॥

समस्तदेवोपचारान् राजोपचारांश्च समर्पयामि ॥
विज्ञातवेदनीयैस्त्वमर्घैर्मुनिभिरञ्चितः ॥
क्षीरार्घ्यं राम पूजान्ते मद्दत्तं प्रतिगृह्यताम् ॥

क्षीरार्घ्यप्रदानम् ॥

ततो यथाशक्त्यर्चनम् ॥
अनया पूजया बालरामः प्रीयताम् ॥

अथोपायनदानम् ॥

अथ श्रीरामायणपठनप्रवचने ॥

अथ ब्राह्मणेभ्यः फलतांबूलादिदानम् ॥

रात्रौ भगवन्नामकीर्तनम् ॥

तप्तसशर्करसुखोष्णगोक्षीरनिवेदनम् ॥ प्रजागरः ॥

परेद्युः प्रातः नित्यकर्मानन्तरं कुंभस्थरामप्रतिमायाः पुनः पूजा ॥ अथ विसर्जनम् ॥ अथाभिषेकः ॥

अथ प्रतिमादानम् ॥ तस्य मन्त्रः ॥

राम त्वामहमावाह्य पूजयित्वा यथाक्रमम् ।
विप्राय वेदविदुषे ददे त्वत्प्रतिमामिमाम् ॥

दातुः प्रतिग्रहीतुश्च शुभानि कुरु सर्वदा ॥

अथ ब्राह्मणभोजनम् ॥

इति सर्वं शुभम् ॥

अनेन पूजाविधानेन काम्यफलार्थिभिर्वैशाखाऽऽषाढ-कार्तिकमास पुनर्वसुनक्षत्रे भगवान् श्रीरामचन्द्रः पूजनीय इति महर्षीणां मतम् ॥

इत्यगस्त्यसंहितायां अगस्त्येन जनकायोपदिष्टं
श्रीरामनवमीपूजाविधानं समाप्तम् ॥
श्रीरामचन्द्रचरणारविन्दाभ्यां नमः ॥

॥ श्रीः ॥

॥ श्रीरामाय नमः ॥

# ॥ श्रीरामनवमीव्रतकथा प्रारंभः ॥

व्यासः—

शृणु भूयः प्रवक्ष्यामि महिमानमुदङ्क ते ।
महतो रामनवमीव्रतस्य दुरितापहम् ॥१॥

अस्ति धर्मपुरं नाम गोदावर्यास्तटे शुभे ।
ग्रामोऽभिजनसंयुक्तद्विजपुङ्गवमण्डितः ॥२॥

तत्रावसद्द्विजश्रेष्ठः कार्तिकेय इति श्रुतः ।
स्मृतिमान् सर्वधर्मज्ञो वेदवेदाङ्गपारगः ॥३॥

सर्वशास्त्रार्थतत्वज्ञः पाठप्रवचने पटुः ।
अद्ध्यापयामास बहून् शिष्यान् देशान्तरागतान् ॥४॥

अनर्थलोलुपः प्राज्ञो भृतिमद्ध्यापने त्यजन् ।
कुर्वन् सर्वाणि कर्माणि श्रौतस्मार्तानि सर्वदा ॥५॥

कालं निनाय श्रीरामे दृढभक्तियुतो वशी ।
वल्मीकजन्मना प्रोक्तं पठन् रामायणं सदा ॥६॥

तदर्थज्ञानशून्येभ्यस्तदर्थान् प्रब्रुवन् मुहुः ।
सर्वस्तुत्यस्सर्वसुहृत् ऐहिकामुष्मिके रतः ॥७॥

पूर्वां तथैवोत्तरांच प्रजपन् रामतापिनीम् ।
ग्रन्थैरामरहस्याद्यैर्निनाय सकलं वयः ॥८॥

तस्य भार्याऽनवद्याङ्गी साक्षाच्छ्रीरिव रूपिणी ।
सरसा सत्कुलोत्पन्ना समर्था गृहकर्मणि ॥९॥

कार्तिकेयस्तया सार्द्धं धर्मज्ञो धर्ममाचरन् ।
रेमे तया सह सुखं रत्येव कुसुमायुधः ॥१०॥

तस्मिन्नधीयमानेषु शिष्येषु शुभबुद्धिषु ।
भद्राचलमहाक्षेत्रादागतः कालकालकः ॥११॥

शुश्रूषया विनयतो विधेयत्वाच्च रूपतः ।
अभवत् सर्वशिष्येभ्यो गुरोर्बहुमतः प्रियः ॥१२॥

गुरोश्च गुरुपत्न्याश्च कर्माण्यप्रेरितोऽप्यधात् ।
रहस्यमखिलं वेद गृहे विश्वासवत्तया ॥१३॥

अवाच्यमपि यत्कर्म शिष्यायावदतां तु तौ ।
शिष्यो युवा गुरुर्वृद्धः युवतिश्च गुरोः प्रिया ॥१४॥

वल्लीनां च वधूनां च निकटस्थावलंबनम् ।
स्वभावो विदितो लोके वाच्यमत्रापरं नु किम् ॥१५॥

क्रमेण गुरुपत्नी च कालकालश्च सङ्गतौ ॥१६॥

शिष्ये विश्वासबाहुल्यात् नैतद्विदितवान् गुरुः ।
बहुशः पश्यति स्मैतौ संलपन्तौ विविक्तगौ ॥१७॥

तथाऽपि शुद्धभावत्वात् नसंशिश्ये गुरुः क्वचित् ।
अथ सा गर्भमाधत्त सरसा कालकालतः ॥१८॥

स्वनिषिक्तमिति ज्ञात्वा गर्भं तं हृष्टमानसः ।
चक्रे पुंसवनादीनि कर्माण्यस्या यथार्हतः ॥१९॥

अथ जातं च तत्पुत्रं रामभक्त्यतिरेकतः ।
रामाभिधानमकरोदुपाद्धयायः प्रसन्नधीः ॥२०॥
केनचित्त्वथ कालेन गुरुश्शिष्यं वचोऽब्रवीत् ॥

गुरुः—

तुभ्यं दत्तास्सर्वविद्या याः काश्चिद्विदिता मया ॥२१॥
अभिज्ञस्त्वं च जातोऽसि नकिञ्चिदवशिष्यते ।
निर्गच्छ त्वं गुरुकुलात् दारान् परिगृहाण च ॥२२॥
तव शुश्रूषया तुष्टो न कांक्षे गुरुदक्षिणाम् ।
इत्युक्ते प्रेमविशदं गुरुणोवाच शिष्यकः ॥२३॥

शिष्यः—

नाहं गुरुकुलाद्गन्तुमिच्छामि स्वगृहं प्रति ।
नमेऽस्ति कांक्षा दारेषु न धनेषु न सद्मसु ॥२४॥
चिरं गुरुकुलावासी गन्तुमिच्छाम्यहं दिवम् ।

व्यासः—

तथा तयोस्संवदतोः सुचिरं गुरुशिष्ययोः ॥२५॥
तयोरभ्यन्तरीभूय गुरुपत्न्यथ साऽब्रवीत् ।

गुरुपत्नी—

आर्यपुत्र विरक्तोऽसौ प्रायः स्त्रीधनसद्मसु ॥२६॥
स्वभावं तव शिष्यस्य वेद्म्यहं चिरवासतः ।
निर्बध्नासि किमर्थं तं गमनाय गृहं प्रति ॥२७॥
यथामनीषितं त्वेष वसत्वसतगृहे स्वयम् ।

प्रयातु स्वगृहं स्वैरं स निर्जिगमिषेद्यदा ॥२८॥
इति पत्न्या वचः श्रुत्वा तथाऽस्त्वित्यब्रवद्गुरुः ।
इत्थं कृताभ्यनुज्ञानः कालकालस्सुदुर्मतिः ॥२९॥
स्वच्छन्दं रममाणोऽसौ गुरुपत्न्या सहावसत् ।
अथ जात्वग्निशालायां रममाणौ यदृच्छया ॥३०॥
गुरुर्ददर्श तेपे च तप्तायःक्षिप्तकीटवत् ।
नेतःपरं वर्तितव्यं गृहेऽस्मिन्निति चिन्तयन् ॥३१॥
गुरुस्सद्यो बहिरगात् जगामाऽविदितं क्वचित् ।
अथ संकोचमुत्सृज्य लज्जाहीनौ गृहेऽत्र वै ॥३२॥
रेमाते भयमुत्सृज्य लोकाद्वाऽपि यमादपि ।
अथ ग्रामस्थिता विप्रा आलोक्यैतौ दुराशयौ ॥३३॥
बलान्निस्सारयामासु गृहात्तस्मात् सुदुर्ग्रहौ ।
अथ तौ शिशुमादाय सञ्चरन्तौ ततस्ततः ॥३४॥
सर्वत्र धिक्कृतौ लोकैस्तुङ्गातट मवापतुः ।
भिल्लपल्ल्यां क्वचित्तत्र वसन्तौ कष्टजीविकाम् ॥३५॥
कृतवन्तौ महापापौ निर्धनौ निष्परिग्रहौ ।
एवं तु दुःखभूयिष्ठे काले याति ततस्तयोः ॥३६॥
कालकालः कालगत्या गृहीतो राजयक्ष्मणा ।
पूयव्रणोलिङ्गितोऽभूत् दाहस्सर्वाङ्गकेऽभवत् ॥३७॥
दिवारात्रं च चक्रन्द स्थितिं नालभत क्वचित् ।
उभयोर्जीविकार्थं च धनं दुर्लभतां गतम् ॥३८॥

न बन्धवो न मित्राणि न पश्चात्तापिनो जनाः ।
तयोरासन् दुष्पथगाः कुत्रवा सुखमासते ॥३९॥

अथ सा तं समुत्सृज्य याता कुत्रापि वृत्तये ।
वने किरातैस्सङ्गम्य रोगाक्रान्ता ममार च ॥४०॥

कालकालस्तु दुःखार्तः भोक्तुमन्नमलब्धवान् ।
बभ्राम भिल्लपल्लीषु भुक्त्यर्थं यस्य कस्यचित् ॥४१॥

स कदाचिद्वियन्मद्ध्ये राजमाने दिवाकरे ।
क्षुधया तृषया चाऽऽर्तो निपपात तरोस्तले ॥४२॥

ततार बहुधा स्मृत्वा स्वकृतं दुष्कृतं बहु ।
किं मया न कृतं पापं गुरुदारानुरोधिना ॥४३॥

प्रायश्चित्तं नयस्यास्ति तन्मया दुष्कृतं कृतम् ।
मत्कृते दुःखमापन्ना साऽपि नष्टा वने क्वचित् ॥४४॥

कथमास्ते किं करोतीत्यनभिज्ञोऽस्मि सर्वथा ।
आक्रान्तोऽस्मिच रोगेण यस्य नास्ति प्रतिक्रिया॥४५॥

कुले महति जातोऽस्मि विप्राणां गुणशालिनाम् ।
श्रीरामभक्तिजीवानां प्रशस्तानां महात्मभिः ॥४६॥

जगत्सर्वं राममयं पश्यन्तं गुरुमाश्रितः ।
अधीताखिलविद्योऽहं तस्य च द्रोहमाचरम् ॥४७॥

फलानीदृशपापानां दुःखान्यनुभवामि च ।
किं करोमि क्व गच्छामि गन्तुं शक्तिश्च नास्ति मे ॥

इत्यसौ क्षुधया चार्तस्तृष्णया च परिप्लुतः ।

प्रलपन् विलपन् खिन्नस्तत्रैव पतितोऽभवत् ॥४९॥

अथ रात्र्यां प्रवृत्तायां गोमायूनां विनर्दताम् ।
आरादाकर्ण्य रटितं शङ्कितो जीवितं प्रति ॥५०॥

साङ्गसाङ्गेपमानाङ्गः निद्रयाच तिरस्कृतः ।
चक्रन्द दुष्कृतात् स्वीयात् गतिं कामप्यनाप्नुवन् ॥

हा राम करुणासिन्धो त्वद्भक्तिमयजीविते ।
कुले जातोऽपि महति विप्राणां शुद्धकर्मणाम् ॥५२॥

आश्रितोऽपि गुरुं साधुं पश्यन्तं त्वन्मयं जगत् ।
महापातकसंयुक्तस्सीदाम्यत्र तरोस्तले ॥५३॥

त्वां विना मे गतिर्नास्ति सत्यमेव वदाम्यहम् ।
मां पावयितुमीशस्त्वं ख्यातः पतितपावनः ॥५४॥

मत्याऽन्यं पुरुषं प्राप्ता साऽप्यहल्या मुनेः प्रिया ।
त्वत्पादरजसा पूता भर्त्रा स्वेन च सङ्गता ॥५५॥

अनाथोऽशरणोऽस्मीह त्वामहं शरणं गतः ।
पाहि मां पावयित्वाऽऽशु म्रियमाणमनाथवत् ॥५६॥

इतीव विलपन् दुःखात् तप्यमानोऽखिलां निशाम् ।
मूर्च्छां प्रत्युषसि प्राप नकिञ्चिदविदत्ततः ॥५७॥

अत्रान्तरे तु भद्राद्रिनाथः श्रीरघुनन्दनः ।
स्वप्ने प्रत्यक्षतां प्राप्य स्वार्चकं प्रत्यवेदयत् ॥५८॥

श्रीरामः—

गोदावर्या दक्षिणेऽत्र तीरे न्यग्रोधमूलके ।

मद्भक्तः कोऽपि मूर्च्छालः पतितोऽस्ति महीतले ॥५९॥

उपवासेन शुद्धात्मा मज्जन्मनवमीदिने ।
रात्रौ जागरणं कृत्वा खेदान्मूर्च्छामुपागतः ॥६०॥

त्वं तत्र गत्वा त्वरितं नित्यकर्मोत्तरक्षणे ।
मत्पादांबु प्रदायास्मै मत्पादतुलसीमपि ॥६१॥

मत्सन्निधिं नयस्वैनं माबीभत्साऽस्य रोगतः ।
इत्युक्त्वाऽन्तर्दधे रामः करुणार्द्रितमानसः ॥६२॥

सोऽर्चकोऽपि प्रबुद्ध्याशु परं विस्मयमागतः ।
अहो धन्योऽस्मि रक्षार्थं प्रभुर्भक्तस्य कस्यचित् ॥६३॥

ममापि दर्शनमदात् कांक्षितं चिरकालतः ।
इतो गच्छामि तं साधुं द्रष्टुं श्रीराघवाज्ञया ॥६४॥

इति ब्रुवन् नदीं गत्वा स्नात्वा जप्त्वा हुताग्निकः ।
गोदावरीं समुत्तीर्य प्राप न्यग्रोधमूलकम् ॥६५॥

तन्मूलेऽलोकयत् कञ्चित् पुरुषं पतितं भुवि ।
श्वासानुमानमात्रेण प्राप्तजीवितधारणम् ॥६६॥

सर्वाङ्गव्रणनिर्यातमेदसा पूयगन्धिनम् ।
आज्ञया रामभद्रस्य बीभत्सां संविहाय सः ॥६७॥

अन्तिकं सोऽर्चकः प्राप्य प्राबोधयदमुं गिरा ।
उत्तिष्ठ को भवानत्र पतितो वृक्षमूलके ॥६८॥

अस्मिन्निर्जनकान्तारे किमर्थं चागतोऽसि भोः ।
इति पृष्टोऽपि नाविन्दत् प्रबोधं कालकालकः ॥६९॥

मुखमभ्युक्षयामास सोऽर्चको निजवारिणा ।
तत उन्मीलयामास नेत्रे जाड्यसमाकुलः ॥७०॥

अपाटवं प्रतिवचस्यवोचद्धस्तसंज्ञया ।
उपवेश्य कथंचित्तं कालकालं ततोऽर्चकः ॥७१॥

अदाद्भगवतः पादतीर्थं भगवदाज्ञया ।
तुळसीमपि देवस्य पादांभोजार्चितां ददौ ॥७२॥

तत्तीर्थपानात्तुळसीभक्षणादपि तत्क्षणात् ।
दृढदेहो निर्मलधीः क्षुत्पिपासाविवर्जितः ॥७३॥

सन्तुष्टपञ्चवर्गोऽसौ तं द्विजोत्तममर्चकम् ।
उत्थाय बहुशो नत्वा वाक्यमेतदुवाच ह ॥७४॥

कालकालः—

नमोऽस्तु ते विप्रवर्य नमोऽस्तु करुणालय ।
त्वत्प्रसादाज्जीवितोऽहं नष्टा मे वेदनाऽखिला ॥७५॥

कस्त्वं देवोऽथवा मर्त्यः रक्षितुं मामिहागतः ।
सर्वं विस्तरशो ब्रूहि नातिगुह्यं यदि प्रभो ॥७६॥

अर्चकः—

सर्वं वक्ष्याम्यहं पश्चात् कथयस्व त्वमादितः ।
को भवान् कुत आयातः कथं ते रोग ईदृशः ॥७७॥

कथमस्मिन् वृक्षमूले पतितोऽसि विमूर्छितः ।
धन्योऽसि राघवेन्द्रस्य भद्राचलनिवासिनः ॥७८॥

करुणापात्रतामागा मुनीनामपि दुर्लभाम् ।

व्यासः—

इत्युक्तः कालकालोऽसौ अर्चकेन रघुप्रभोः ॥७९॥
स्वीयं वृत्तान्तमखिलमकार्यमपि गुह्यकम् ।
भद्राचलात् गुरुकुलप्राप्त्यादिं गद्गदस्वरः ॥८०॥
वृक्षाधस्तलपातान्तं मद्भुचे मद्भुचे ह्रियाऽन्वितः ।
तच्छ्रुत्वा हृष्टरोमाऽसौ अर्चको राघवप्रभोः ॥८१॥
आज्ञयोत्सृज्य बीभत्सां कर्मण्यस्य तनावपि ।
प्रत्यब्रवीच्च भद्राद्रिनाथस्याज्ञां हृदि स्मरन् ॥८२॥

अर्चकः--

रामदासाभिधो विप्रो रामपादांबुजार्चकः ।
भद्राचले वसाम्यस्मिन् श्रीरामार्चनजीवनः ॥८३॥
ह्यो रात्रेरन्त्ययामे तु स्वप्ने मामेत्य राघवः ।
आज्ञामदात् त्वामानेतुं दातुं च तुळसीजलम् ॥८४॥
अहो धन्योऽसि रामस्त्वां प्राह मद्भक्त इत्यपि ।
श्रीरामनवमी पुण्या ह्यः किलार्कग्रहोपमा ॥८५॥
उपोपितोऽसि तत्र त्वं रात्रौ जागरितोऽसि च ।
विलापव्याजतो रामनामान्यपि सदाऽवदः ॥८६॥
तेन तुष्टोरघूत्तंसस्त्वां मद्भक्त इतीरयन् ।
मां प्राहिणोत्त्वामानेतुं क्षेत्रं भक्ताचलाह्वयम् ॥८७॥
महापातक्यपि भवान् पूत इत्येव मे मतिः ।
तुलसीमिश्ररामांघ्रितीर्थस्याद्य निषेवणात् ॥८८॥

तदेहि मामनुसर व्रज भद्राचलाधरम् ।
इत्युक्त्वा रामदासस्तं नीत्वा भद्राचलेशितुः ॥८९॥

सन्निधिं प्राह तं भूयः एष रामस्य सन्निधिः ।
अत्र स्थित्वा राघवस्य कृपामार्जयितुं यत ॥९०॥

अनुष्ठिता प्रभोराज्ञा गच्छाम्यहमिति ब्रुवन् ।
अर्चकोऽर्चितुमाधावत् राघवं राघवालयम् ॥९१॥

अत्रान्तरे समागच्छत् कालकालमतित्वरः ।
राघवेन्द्रो ऽलयस्य कार्याध्यक्षस्त्वरान्वितः ॥९२॥

अर्चकानीतमालोक्य कालकालं वचोऽब्रवीत् ।

कार्याध्यक्षः—

धन्यस्त्वं रामभक्ताग्रयः वस त्वं भद्रपर्वते ॥९३॥

तवान्नपानदानार्थं मां न्ययुङ्क्त रघूत्तमः ।
शृण्वाज्ञां रामभद्रस्य त्वामुद्दिश्य कृतां प्रभोः ॥९४॥

गोदावर्यां प्रतिदिनं प्रभाते स्नानमाचरन् ।
नित्यकर्माणि कुर्वाणस्ततो भद्राचलोत्तमम् ॥९५॥

प्रदक्षिणं व्रज जपन् दशकृत्वो मनुं प्रभोः ।
रामस्यापि च गायत्रीं रामतापनिकामपि ॥९६॥

प्रतिप्रदक्षिणं रामसन्निधौ भक्तितः कुरु ।
नमस्कारान् द्वादश च ततो मद्ध्याह्नकालके ॥९७॥

मत्प्रेरितास्तु मद्भृत्याः राघवाय निवेदितम् ।
दास्यन्ति तेऽन्नपानादि सायं चापि तथा कुरु ॥९८॥

इत्येवमाचरन् भक्त्या क्षेत्रेऽस्मिन् वस यन्त्रितः ।
नान्तस्त्वया प्रवेष्टव्यं राघवस्यालयस्य च ॥९९॥

न च संभाषणीयस्स्यात् नस्पृश्यः कोऽपि ते जनः ।
कुत्राऽपि कोणे वर्षादिबाधाहीने वसैककः ॥१००॥

इत्युक्त्वा स्वमविहितां रामस्याज्ञामनुष्ठिताम् ।
कृत्वाऽगात् कार्यधुरया कार्याध्यक्षस्तमालयम् ॥१०१॥

गते तस्मिन् कालकालः प्रसन्नेन्द्रियमानसः ।
हर्षनिर्भरशान्तात्मा मनस्येवमचिन्तयत् ॥१०२॥

अहो श्रीरामभद्रस्य देवदेवस्य शार्ङ्गिणः ।
सर्वलोकशरण्यस्य शरण्यत्वमनावृतम् ॥१०३॥

क्वाहं महापातकवान् क्वाऽसौ श्रुतिभिरीडितः ।
दर्शितं मेऽद्य पतितपावनत्वं श्रुतिस्थितम् ॥१०४॥

वल्मीकजन्ममुनिनोद्घुष्टा दृष्टा च तत्कृपा ।
अहो श्रीरामनवमीपुण्यत्वमतिपावनम् ॥१०५॥

अन्नाभावेतु तत्राहमुपोष्य न तु यत्नतः ।
वेदनाया असह्यत्वात् जाग्रद्रात्रिं न भक्तितः ॥१०६॥

लोकरीत्या कृच्छ्रकाले रामं संबोधयन् बलात् ।
श्रीरामस्य कृपापात्रभूतो जातोऽस्मि सर्वथा ॥१०७॥

अन्यथा त्वर्चकस्याज्ञा कथं जायेत मत्कृते ।
कार्याध्यक्षः कथं वा मय्यनुकंपां प्रदर्शयन् ॥१०८॥

कर्तव्यं चाप्युपदिशेत् प्रभोराज्ञानुसारतः ।

व्यासः—

इतीव चिन्तयन् वाचा मनसा शिरसाऽपि च ॥१०९॥

प्रणम्य रामभद्राय कार्याध्यक्षोक्तरीतितः ।
सिषेवे राघवं भक्त्या संवत्सरमतन्द्रितः ॥११०॥

अथ संवत्सरे पूर्णे रामस्सर्वगुहाशयः ।
अशीर्णव्रतमालोक्य कालकालं कृपार्द्रितः ॥१११॥

आज्ञापयद्धनूमन्तं तस्योद्धाराय सर्वथा ।

श्रीभगवान्—

सर्वं विदितमेवेदं कालकालस्य चेष्टितम् ॥११२॥

आदावयमुपोष्यैव मज्जन्मनवमीदिने ।
मन्नाम कीर्तयन्रात्रौ जजागार च सर्वथा ॥११३॥

तेन पुण्यप्रभावेन नीत्वाऽस्मद्दासभूधरम् ।
प्रदक्षिणप्रक्रमणे नियुक्तोऽयं विशुद्धये ॥११४॥

पूर्णं संवत्सरं कालं अभग्नव्रत एषकः ।
सम्यक्परिचचारात निद्रातंद्रीविवर्जितः ॥११५॥

चैत्रेऽस्मिन् मासि नवमी पुनर्मत्तोषिकाऽऽगता ।
तस्यामयं मा मभ्यर्च्य प्रयातु सदनं निजम् ॥११६॥

तथा कृतेऽस्मै दास्यामि योगिनामपि दुर्लभाम् ।
आनन्दरूपां सायुज्यमुक्तिं वेदान्तघोषिताम् ॥११७॥

नाहं यज्ञैर्नच ध्यानैर्नप्रणामै र्नच स्तवैः ।
तथा तु परितुष्यामि यथाविधि कृतैरपि ॥११८॥

यथा मज्जन्मनवमीपूजयोपोषणेन च ।
रात्रौ जागरणेनापि तथा पारायणेन च ॥११९॥

श्रीमन्मज्जन्मघट्टस्य रामायणगतस्य च ।
किंत्वसौ गुरुदाराङ्गस्पर्शदूषितदेहवान् ॥१२०॥

दग्ध्वा तन्मांसरुधिरं त्वचैव सह वह्निना ।
पुनस्संपाद्य तत्सर्वं मत्पादसलिलोक्षणात् ॥१२१॥

मज्जन्मनवमीपूजा मस्मा उपदिश स्वयम् ।
अथ सन्दर्शयिष्यामि तस्यात्मानं प्रसन्नधीः ॥१२२॥

व्यासः--

इत्याज्ञप्तोऽञ्जनासूनुः तथेत्युक्त्वा प्रणम्य च ।
वृद्धविप्राकृतिर्भूत्वा रामनामलसन्मुखः ॥१२३॥

भगवत्पादसलिलं गृहीत्वा करकेण च ।
भक्त्या प्रदक्षिणकृतं कालकालमुपागमत् ॥१२४॥

शैलनैर्ऋतदिग्भागे कक्षे वह्निं समिद्धय च ।
चरन्तं तत्समीपे च तमलापातयच्छलात् ॥१२५॥

अथ हा रामरामेति विलपन् पतितोऽनले ।
क्षणेनाभूद्विसंज्ञोऽसौ पूर्वमेव हि दुर्बलः ॥१२६॥

अस्याग्निर्भक्षयामास मेदोमांसासृगादिकम् ।
प्राणा अस्थिगता आसन् तस्य श्रीराघवाज्ञया ॥१२७॥

अथ निश्शेषतो नष्टे तस्य देहेऽस्थिशेषके ।
तदस्थिकूटं तद्वह्नेः समुत्तार्याञ्जनासुतः ॥१२८॥

पादोदकेन रामस्य प्रोक्षदेवमनुस्मरन् ।
अथ सद्यस्समापेदे कोटिसूर्योज्ज्वलां तनुम् ॥१२९॥

कालकालः कृपासिन्धो राज्ञया राघवेशितुः ।
अथ स्वदेहं वीक्ष्यासौ सर्वरोगविवर्जितम् ॥१३०॥

हर्षनिर्भरचित्तस्सन् प्रतिपेदे न किञ्चन ।
पुरःस्थितं हनूमन्तं वृद्धब्राह्मणरूपिणम् ॥१३१॥

अनेनैव कृतं सर्वं इति जज्ञे विचिन्तयन् ।
बहुकृत्वः प्रणम्याथ तस्यांघ्रिकमलद्वयम् ॥१३२॥

उद्वीक्ष्योवाच तद्वक्त्रं प्रसन्नेंद्रियमानसः ।

कालकालः—

को भवान् करुणासिन्धुर्मां तारयितुमागतः ॥१३३॥

मन्ये पातयिता मेऽग्नौ तथोत्तारयिता भवान् ।
पूर्वदेहो मया लब्धः कान्दिशीको महागदः ॥१३४॥

सर्वं ममाद्य संपन्नं भवतः करुणावशात् ।
त्वां प्रपन्नोऽस्मि विप्रेन्द्र पाहि मामापदं गतम् ॥१३५॥

श्रीहनूमान्—

धन्यस्त्वं धन्यधन्यस्त्वं धन्यस्त्वं पुनरेव तु ।
कृपामपारां रामस्य लब्धवानसि दुर्लभाम् ॥१३६॥

त्वामानेतुं तरोर्मूलात् प्रैषयत् स्वपदार्चकम् ।
तवान्नपानदानार्थं कार्याध्यक्षं समादिशत् ॥१३७॥

त्वामद्य नीरुजं कर्तुं प्राहिणोन्मां रघूत्तमः ।

सर्वं श्रीरामनवमीदिनोपोषणजागरात् ॥१३८॥

अज्ञानेनापि संस्पृष्टो दहत्येव हि पावकः ।
आगामिन्यां नवम्यां तु रामजन्ममहोत्सवः ॥१३९॥

भविता तत्र भक्त्या त्वं नित्यकर्मपरायणः ।
उपोषणं जागरं च विधिवत् कुरु संयतः ॥१४०॥

पूजयस्व रघूत्तंसं मातुर्वा पितुरेव वा ।
उत्सङ्गस्थं संभवद्भिर्द्रव्यैर्भक्तिमयीभवन् ॥१४१॥

वाल्मीकिमुनिना प्रोक्तश्रीमद्रामायणस्थितम् ।
श्रीरामजन्मघट्टस्थं अव्यग्रः पठ सर्गकम् ॥१४२॥

प्रब्रूह्यर्थांश्च तस्याथ श्रोतृभ्यस्सूक्ष्मबुद्धितः ।
तदन्ते पूजय पुनर्गन्धपुष्पाक्षतैर्द्विजम् ॥१४३॥

तस्मिन् वाल्मीकिमावाह्य नमस्कुरु मुहुर्मुहुः ।
परेद्युः प्रातरेव त्वं कृतनित्याह्निकक्रियः ॥१४४॥

भद्राचलं समारुह्य रामं दर्शय भक्तितः ।
कवाटोद्घाटनात्पूर्वं सूर्येऽभ्युदितमात्रतः ॥१४५॥

इत्युक्त्वा भगवन् कस्त्वमिति तेन मुहुर्मुहुः ।
पृच्छ्यमानो मारुतसुतोऽहमस्मीति तिरोदधे ॥१४६॥

कालकालस्तु स्वं भाग्यं वीक्ष्य विस्मितमानसः ।
याच्ञया लब्धद्रव्येण श्रीरामनवमीदिने ॥१४७॥

कुटीं काञ्चित् संप्रकल्प्य गोदावर्याश्शुभे तटे ।
विलिख्य भूर्जपत्रेतु नवावरणयन्त्रकम् ॥१४८॥

कौसल्योत्सङ्गविलसन्मूर्तिं रामं विभाव्य च ।
भक्त्या राममयो भूत्वा पूजयामास सादरम् ॥१४९॥

पूजान्ते च यथोद्दिष्टं विप्रं वाल्मीकिरूपिणम् ।
पूजयित्वा नमस्कृत्य पूजामथ समापयत् ॥१५०॥

अपोऽप्यगृह्णन् कृत्स्नं तद्दिनं नियतमानसः ।
रामायणस्थश्रीरामजनिसर्गं पठन् मुहुः ॥१५१॥

आनन्दबाष्पं गळयन् श्रोतॄणां तत्पुरौकसाम् ।
प्रोवाचार्थान् सूक्ष्मतमान् वाल्मीकिहृदयस्थितान् ॥

श्रीरामनवमीदिव्यमहिमानं ततोऽवदत् ।
स्वस्यातिकुत्सिततमं चरित्रमभिवर्ण्य च ॥१५३॥

अज्ञानाद्रामनवमीदिनोपोषणजागरात् ।
सिद्धिं सुमहतीं प्राप्तां आञ्जनेयागमान्तकाम् ॥१५४॥

निवेदयमास पुनः पुरस्थानामनुक्रमात् ।
रात्रिं चापि जजागार रामकीर्तनतत्परः ॥१५५॥

जनैस्संमानितोऽभीक्ष्णं कालकालः प्रसन्नधीः ।
निर्वर्त्य रामनवमीव्रतमेवं यथोदितम् ॥१५६॥

प्रातःस्नात्वा नित्यकृत्यं समाप्यार्कोदये ततः ।
भद्राचलं समारुह्य देवद्वारमुपागमत् ॥१५७॥

ततश्चोद्घाटिते द्वारे ज्योतीरूपे मनोहरे ।
प्रकाशमाने श्रीरामे तदादि प्रेक्ष्य विस्मितः ॥१५८॥

भक्त्या हर्षेण चाक्रान्तः कालकालः प्रसन्नधीः ।

तुष्टाव शतशो नत्वा तत्प्रसादात्तवाङ्मयः ॥१५९॥

श्रीराम कोसलसुताजठरामृताब्धि-
पीयूषभा दशरथाङ्कविभूषणाग्र्य।
साकेतवासिजननेत्रसुधाञ्जनश्रीः
स्वामिन् कृपाजलनिधे तव सुप्रभातम् ॥१॥

श्रीराम कौशिकमखावन सुन्दपत्नी-
प्राणाशुगाहिवर बालमनुष्यरूप।
मारीचमत्तगजसिंह सुबाहुशैल-
वज्राभसायकवतस्तव सुप्रभातम् ॥२॥

श्रीराम शङ्करशरासवरेक्षुदण्ड-
मत्तेभ मैथिलसुताननपद्मभृङ्ग।
श्रीजामदग्न्यमदनाममहान्धकार-
सूर्याभ वीर्यजलधे तव सुप्रभातम् ॥३॥

श्रीराम तातवचसोज्झितयौवराज्य
श्रीमत्सुमन्त्रपरिदर्शितदिव्यरूप।
आलिङ्गनेन दृढितातिनिषादसख्य
श्रीचित्रकूटगृहिणस्तव सुप्रभातम् ॥४॥

श्रीराम दंडकवनागमनानसूया-
दत्ताङ्गरागलसितावनिजासहाय।
हत्वा विराधमनुदृष्टमुनीन्द्रसङ्घ-
संपूज्यमानगृहिणस्तव सुप्रभातम् ॥५॥

श्रीराम कुंभजगृहीतनिजाशुगास
श्रीमज्जटायुरभिदत्तनिजैकलोक ।
हत्वा कबन्धमनुदर्शितपंप सीता-
विश्लेषदुःखित विभो तव सुप्रभातम् ॥६॥

श्रीराम मित्रसुतमित्र सुरेन्द्रपुत्र-
कालान्तकाभशर कामितदानदक्ष ।
तारास्तुताद्भुतगुणाकर कीशराज्य
मर्कात्मजेऽर्पितवतस्तव सुप्रभातम् ॥७॥

श्रीराम मैथिलसुतास्थितिवेदकाय
संश्लेषदानिलसुताय, विभीषणाय ।
दत्ताभयाखिलमहादुरितक्षयार्थं
श्रीसेतुबन्धनकृतस्तव सुप्रभातम् ॥८॥

रामाय रात्रिचरतूलमहानिलाय
वह्न्युत्थितावनिसुतोज्वलपार्श्वकाय ।
ब्रह्मादिदेवविनुताय निजाधिराज्ये
पट्टाभिषिक्तशिरसेऽस्तु नमश्शतं ते ॥९॥

व्यासः–

इति स्तुत्वा रघूत्तंसं प्रातःपूजां विलोकयन् ।
तत्रैव कालकालोऽभूत् भाविकार्यमसंविदन् ॥१०॥
ततः पूजावसाने तु प्रयातेष्वर्चकादिषु ।
आविरासीद्दयासिन्धुस्सीतालक्ष्मणसंयुतः ॥११॥
हनूमता सविनयं दत्तहस्तावलंबनः ।

पुरतः कालकालस्य कौसल्यानन्दवर्द्धनः ॥१२॥

भक्ताग्रगण्यस्तं वीक्ष्य पारवश्यं परं गतः ।
आनन्दाश्रुपरिक्लिन्नः रोमाञ्चेनातिनिर्भरः ॥१३॥

नाकिञ्चिदविदद्विप्रः पादयोः पतितः परम् ।
तमुत्थाप्याथ देवेशः वात्सल्यं दर्शयन् परम् ॥१४॥

प्राह प्रगल्भमधुरं वाक्यमव्यक्तदर्शनः ।

श्रीरामः–

गते वर्षे तु नवमीव्रतानुष्ठानतस्तव ॥१५॥

तुष्टोऽहं त्वां पावयित्वा यक्ष्माणं ते विशोषयन् ।
भद्राचलं प्रापयं त्वां कानने तरुमूलतः ॥१६॥

प्रदक्षिणप्रक्रमतः कृत्स्नं वर्षं ममाधुना ।
व्यनाशयं ते यक्ष्माणं अदां वज्रसमाङ्गताम् ॥१७॥

अद्य मज्जन्मनवमीव्रतानुष्ठानपुण्यतः ।
आविरासं तव पुरः वरानभिमतान् वृणु ॥१८॥

कालकालः–

भगवन् सर्वलोकेश रघूणां वंशवर्धन ।
कः पटुस्ते वर्णयितुं कृपां वाचामगोचराम् ॥१९॥

अपावयो मामिति यन्नैतच्चित्रं मतं मम ।
मत्याऽन्यपुंगतां काञ्चिन्मुनिपत्नीमपावयः ॥२०॥

असंख्येषु ममागस्सु नाश्चर्यं यत्क्षमा तव ।
प्रियोरसि व्रणकरं काकं चाक्षमथा न किम् ॥२१॥

भवरोगमनिर्वार्यं हंसि त्वं हि सकृत्स्मृतः ।
मम रोगं नाशयस्त्वमिति मेऽद्य नविस्मयः ॥२२॥

शरभङ्गादिमुनिभिः प्रार्थनीयात्मदर्शनः ।
महापातकिनो मेऽद्य आविरासीः स्वयं पुरः ॥२३॥

वरमन्यं कं नु याचे त्वद्दर्शनसुखादहम् ।
तथाऽपि दयसे मे चेत् वरमेनं प्रदापय ॥२४॥

सदा स्मृतिस्ते भवतु त्वदन्यन्नच भातु मे ।
प्राणोत्क्रान्तौ रघूत्तंस अवशस्यापि मे पुनः ॥२५॥

रामायणं पठतु वाक्पश्यतु त्वां मनोऽपि मे ।
सीतासंशोभितोत्सङ्गः हनूमत्स्कन्धमास्थितः ॥२६॥

चिन्मुद्राढ्यः स्मेरवक्त्रः प्राणान्ते दर्शनं दिश ।
मत्कृतां ते स्तुतिमिमां सुप्रभातपदाङ्किताम् ॥२७॥

स्मृत्वा त्वां पठतां प्रातः प्रसन्नोऽभीष्टमर्पय ।

श्रीभगवान्—

मोक्षहेतुं वरं श्रेष्ठं मत्तो याचितवानसि ॥२८॥

यथाभिऽलाषस्ते विप्र सर्वं संपत्स्यते तथा ।
अन्तकाले तु संप्राप्ते पठन् रामायणं नरः ॥२९॥

नपुनर्जायते भूमौ सर्वकर्मक्षयो यतः ।
विशेषेण च ते वक्ष्ये मोक्षहेतून् प्रघट्टकान् ॥३०॥

विभीषणाभयकरं जटायुर्मोक्षदानकम् ।
अयोद्ध्याकाण्डप्रारंभे वाल्मीकेर्गुणवर्णनम् ॥३१॥

मम राज्याभिषेकं च सीतापाणिग्रहोत्सवम् ।
तन्वन्ते पठतां विप्र नूनं नहि पुनर्भवः ॥३२॥

मुमुक्षूणां निषेव्यां त्वमयोद्ध्यां याहि निर्वृतः ।
मत्पादस्पर्शपूतायां सरय्वां स्नानमाचरन् ॥३३॥

मज्जन्मभूमौ वाल्मीकिप्रोक्तं मे चरितं पठन् ।
अयत्नलब्धाशनतस्सन्तुष्टो मामनुस्मरन् ॥ ॥३४॥

आचरन् हनुमत्प्रोक्तविधिना नवमीव्रतम् ।
आयुश्शेषं नय ततः प्राणान्ते मम दर्शनम् ॥३५॥

भविता ते ततस्सिद्धिं मोक्षाख्यां लप्स्यसे ध्रुवम् ।
त्वया प्रणीतं स्तोत्रं यः श्रद्धाभक्तिसमन्वितः ॥३६॥

शयनादुत्थितः काल्ये पादशौचादितः परम् ।
अयोद्ध्याभिमुखो भूत्वा पठेन्मां मनसा स्मरन् ॥३७॥

तस्याहं सुप्रसन्नस्स्यां चतुर्वर्गफलं ददे ।
इत्युक्त्वाऽन्तर्दधे सद्यः रामो दाशरथिः प्रभुः ॥३८॥

कालकालोऽपि हृष्टात्मा रामस्य जगदीशितुः ।
प्रसादं च प्रभावं च वात्सल्यं च क्षमामपि ॥३९॥

श्रीमद्रामायणग्रन्थपठने प्रीतिमुत्तमाम् ।
सञ्चिन्त्य लब्धरोमाञ्चः भद्राद्रिं संप्रणम्य च ॥४०॥

गोदावरीं च भक्तांश्च साकेतं क्रमशो ययौ ।
तत्र गत्वा यथोद्दिष्टं सर्वं कर्म समाचरन् ॥४१॥

प्राणान्ते मुक्तिमापेदे राघवस्य प्रसादतः ।

इत्युदङ्क तव प्रोक्तं श्रीरामनवमीव्रतम् ॥४२॥

सर्वव्रतानुष्ठानेन सर्वक्षेत्रनिषेवया ।
सहस्राणां सहस्रस्य विप्राणामन्नदानतः ॥४३॥

यत्पुण्यं लभ्यते पुंभिः श्रीरामनवमीव्रतात् ।
ततोऽधिकं च लभ्येत नार्थवादोऽयमीरितः ॥४४॥

श्रीरामनवमीहीनो यस्तु स्यात् बहुधर्मकृत् ।
न तस्य तद्धर्मफलं अवैकल्येन सिद्ध्यति ॥४५॥

तस्मात् कुरु यथाशक्ति श्रीरामनवमीव्रतम् ।
वासुकिप्रमुखास्सर्वे सर्पास्स्युस्ते वशानुगाः ॥४६॥

राघवस्य प्रसादेन मुक्तिमन्ते च लप्स्यसे ।
श्रीरामनवमीपूजामहिमप्रतिपादकम् ॥४७॥

यः पठेदिदमध्यायद्वयं राममनुस्मरन् ।
तस्य सिद्ध्यन्ति सर्वार्थाः स्वप्ने रामं च पश्यति ॥४८॥

इति श्रीपाद्मोत्तरखंडे श्रीभद्राचलमाहात्म्ये
श्रीरामनवमीव्रतानुष्ठानकथनं नाम
त्रयोविंशोऽध्यायः ॥

॥ श्रीः ॥

॥ श्रीरामो जयति ॥

अथ श्रीरामभक्तिकल्पलतायाम्

## ॥ श्रीरामायणपारायणक्रमः ॥

अथेदानीं नवरात्रोत्सवादिषु श्रीरामायणपठनश्रवणयोरवश्यकर्तव्यत्वात्तत्पठनश्रवणविधिर्निरूप्यते ॥ यः श्रीरामभक्तः श्रीरामायणस्य पारायणारंभं वा श्रवणारंभं वा चिकीर्षति, स सद्गुरुसकाशात् सत्संप्रदायानुसारेण तदुपदिष्टसुमुहूर्ते श्रीरामायणस्य पारायणारंभं श्रवणारंभं वा कुर्यात् ॥

तत्रादौ श्रवणविधिः—शमदमादिसकलगुणगणालङ्कृतमाचार्यं प्रणामप्रार्थनापूर्वं निमन्त्र्य तं दिव्यासने प्राङ्मुखमुदङ्मुखं वा निवेश्य तं वाल्मीकिं विभाव्य मधुपर्कादिभिः पूजयित्वा तत्पुरतो दिव्यसिंहासनं संस्थाप्य तस्मिन् श्रीरामायणग्रन्थं निधाय हनूमत उपवेशनार्थं तत्पुरःप्रदेशे अन्यत्पीठं निधाय तत्र तस्य यत्किञ्चित्फलादिकमुपदां समर्प्य स्वयं प्राङ्मुख उदङ्मुखोवा दक्षिणे कर्णे कथा यथा प्रविशेत् तथोपविश्य आचार्येण पठ्यमानं श्रीमद्रामायणं तेनोच्यमानं तदर्थजातं च भक्तिविनयाभ्यां शृणुयात् ॥

अथ पारायणविधिः ॥

स्वयं पारायणपक्षे प्राङ्मुख उदङ्मुखो वा स्वयमुपविश्य पुरतस्सिंहासने श्रीमद्रामायणग्रन्थं यथा देवस्य दक्षिणभागे

स्वासनं भवेत्तथा निधाय तत्पुरतो हनुमत्पीठं पूर्वोक्तप्रकारेण स्थापयित्वा स्वनक्षत्रराशिनामोच्चारणपुरस्सरं श्रीरामचन्द्रप्रीत्यर्थं (काम्योद्देशश्चेत् अमुककामनासिद्ध्यर्थं) श्रीरामायणपारायणं करिष्ये। तदङ्गं श्रीरामायणकोशोपरि सपरिवारश्रीरामचन्द्र-पूजां करिष्य इति सङ्कल्प्य। कलशपूजां कृत्वा प्रथमत आरंभदिने काण्डारंभदिने च निर्विघ्नपारिसमाप्त्यर्थं गणपति-पूजां (1) कृत्वा श्रीरामायणग्रन्थे श्रीरामपूजां (2) यथाशक्ति षोडशभिरुपचारैः कुर्यात्। ततो हनुमन्तमाराध्य दण्डवत् प्रणमेत् ॥

तत्र श्रीरामध्यानप्रकारः—बालकाण्डं पिपठिषुः।

'काकपक्षधरं देवं वनमालाविभूषितम्।
चापेषुहस्तं श्रीरामं ध्यायेच्छ्रीबालकाण्डके' ॥

अस्मिन् श्रीरामायणपुस्तके श्रीरामचन्द्रं ध्यायामि।
एवमन्येषामपि काण्डानां पठनसमये
तत्तत्काण्डयोग्यध्यानश्लोका लिख्यन्ते ॥

तत्र अयोध्याकाण्डस्य—

'सीतादेवीयुतं रामं सर्वभूषणभूषितम्।
सौमित्रिसहितं ध्यायेदयोध्याकाण्ड उत्तमे' ॥

अथारण्यकाण्डस्य—

'जटिलं चीरवसनं दण्डकारण्यवासिनम् ॥
मुनिमण्डलसंवीतं ध्यायेदारण्यकाण्डके' ॥

---

(1) (2) उभयत्र नाळिकेरखण्डनिवेदनमावश्यकम् ॥

अथ किष्किन्धाकाण्डस्य—

'सुग्रीवादियुतं रामं शैलकूटकृतालयम् ।
महेश्वरसमं ध्यायेत् किष्किन्धाकाण्ड उत्तमे' ॥

अथ सुन्दरकाण्डस्य—

'चन्द्रबिंबसमाकारं वाञ्छितार्थप्रदायकम् ।
हनूमदर्पितमणिं ध्यायेत्काण्डेतु सुन्दरे' ॥

अथ युद्धकाण्डस्य—

'रावणादिनिहन्तारं ब्रह्मरुद्रादिसेवितम् ।
युद्धकाण्डे ससीतं च ध्यायेत् सेष्वाससायकम्' ॥

अथोत्तरकाण्डस्य—

'अगस्त्यादिमुनिस्तुत्यं राज्यसिंहासनस्थितम् ।
सर्वदेवोत्तमं ध्यायेदुत्तरे काण्ड उत्तमे' ॥

इति ध्यानप्रकारः—

अथ पारायणकर्त्रा श्रीरामायणमहामन्त्रस्य ऋषिच्छन्दोन्यासध्यानमूलमन्त्रजपादिकं यथाशक्ति कृत्वा तत्तत्काण्डपारायणमात्रविहित तत्तत्काण्डऋषिच्छन्दोदेवतादिन्यास मूलमन्त्रजपः कार्यः ॥ तदित्थम्—अस्य श्रीमद्वाल्मीकिरामायणमहामन्त्रस्य । नारदो भगवानृषिः । अनुष्टुप्छन्दः । सीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतः श्रीरामचन्द्रो देवता । ओं बीजम् । "धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदीति शक्तिः । पौरुषे चाप्रतिद्वन्द्वश्शरैनं जहि रावणि" मिति कीलकम् । श्रीसीतारामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः । धर्मात्मा अङ्गुष्ठाभ्यां

नमः। सत्यसन्धश्च तर्जनीभ्यां नमः। रामः मध्यमाभ्यां नमः। दाशरथिर्यदि अनामिकाभ्यां नमः। पौरुषे चाप्रतिद्वन्द्वः कनिष्ठिकाभ्यां नमः। शरैनंजहि रावणिं करतलकरपृष्ठाभ्यां नमः। धर्मात्मा हृदयाय नमः। सत्यसन्धश्च शिरसेस्वाहा। रामः शिखायै वषट्। दाशरथिर्यदि कवचायहुम्। पौरुषेचाप्रतिद्वन्द्वः नेत्रत्रयाय वौषट्। शरैनं जहि रावणिं अस्त्रायफट्। भूर्भुवस्सुवरोमिति दिग्बन्धः। ध्यानम्—सहस्रादित्यसङ्काशं सर्वशत्रुनिबर्हणम्। रामशक्तिमयं ध्यायेदमोघं रामसायकम्॥ लं पृथिव्यात्मने गन्धान् समर्पयामि। हं आकाशात्मने पुष्पाणि समर्पयामि। यं वाय्वात्मने धूपमाघ्रापयामि। रं अग्न्यात्मने दीपं दर्शयामि। वं अमृतात्मने अमृतोपहारं महानैवेद्यं कल्पयामि। सं सर्वात्मने सर्वोपचारान् समर्पयामि। अथ मूलमन्त्रः—'धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि। पौरुषे चाप्रतिद्वन्द्वश्शरैनं जहिरावणिम्'॥ एनं मन्त्रं अष्टोत्तरशतावृत्ति, तदर्द्धावृत्ति, तदर्द्धावृत्ति, दशावृत्ति, त्रिर्वा जपेत्। ततः 'सकृदेव प्रपन्नाय तवास्मीति च याचते। अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम'॥ इति भगवद्व्रतप्रतिपादकं मन्त्रं मूलमन्त्ररीत्या पठेत्। तथाचोक्तं पाराशर्ये—

'यदा यदा हि रामस्य वृत्तं पिपठिषेद्बुधः।
तदा तदा तु धर्मात्मेत्येतं मूलमनुं जपेत्॥

श्रीरामचरणांभोजद्वन्द्वं ध्यायन् प्रसन्नधीः।
सकृदेवेति रामस्य व्रतं च शुभदं जपेत्' इति॥

अथ प्रत्येकं काण्डऋषिन्यासादिकं लिख्यते । तत्र श्रीबालकाण्डस्य । अस्य श्रीबालकाण्डमहामन्त्रस्य, ऋश्यशृङ्ग-ऋषिः, अनुष्टुप्छन्दः, श्रीरामो देवता, रां बीजम्, नमश्शक्तिः, रामायेति कीलकम्, दशरथसहितश्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः । सुप्रसन्नः अङ्गुष्ठाभ्यां नमः । शान्तमनाः तर्जनीभ्यां नमः । सत्यसन्धः मद्ध्यमाभ्यां नमः । जितेन्द्रियः अनामिकाभ्यां नमः । धर्मज्ञो नयसारज्ञः कनिष्ठिकाभ्यां नमः । राजा दशरथो जयी करतलकरपृष्ठाभ्यां नमः । एवं हृदयादिन्यासाः। भूर्भुवस्सुवरोमिति दिग्बन्धः । ध्यानम्—इन्दीवरदळश्यामः पुण्डरीकनिभेक्षणः । धृतकोदण्डतूणीरो रामएव गतिर्मम ।। लमित्यादि पञ्चपूजाः । अथ मूलमन्त्रः—सुप्रसन्नश्शान्तमनास्सत्यसन्धो जितेन्द्रियः । धर्मज्ञो नयसारज्ञो राजा दशरथो जयी ।। यथाशक्ति जपित्वा पुनर्न्यासादिकं कुर्यात् ।।

अथायोद्ध्याकाण्डस्य—

अस्य श्रीमदयोद्ध्याकाण्डमहामन्त्रस्य, वसिष्ठऋषिः, अनुष्टुप्छन्दः, श्रीभरतोदेवता । भंबीजम्, नमश्शक्तिः, भरतायेति कीलकम् । भरतसहित श्रीरामप्रीत्यर्थे जपे विनियोगः। भरताय नमस्तस्मै अङ्गुष्ठाभ्यां नमः । सारज्ञाय तर्जनीभ्यां नमः । महात्मने मध्यमाभ्यां नमः । तापसाय अनामिकाभ्यां नमः । अतिशान्ताय कनिष्ठिकाभ्यां नमः । शत्रुघ्नसहिताय करतलकरपृष्ठाभ्यां नमः । एवं हृदयादिन्यासाः । भूर्भुवस्सुवरोमिति दिग्बन्धः । ध्यानम्—श्रीरामपादकमलद्वयपादुकान्तरासक्तचित्तकमलं कमलायताक्षम् । ब्राह्मचा प्रसन्नवदनं सुरुचा

वदान्यं शत्रुघ्नसेवितमहं भरतं नमामि ॥ लमित्यादिपञ्चपूजाः॥ अथ मन्त्रः—भरताय नमस्तस्मै सारज्ञाय महात्मने। तापसायातिशान्ताय शत्रुघ्नसहिताय च ॥ यथाशक्ति जपानन्तरं पुनः हृदयादिन्यासाः ॥

अथारण्यकाण्डस्य—

अस्य श्रीमदारण्यकाण्डमहामन्त्रस्य शरभङ्गऋषिः, अनुष्टुप्छन्दः, इन्द्रो देवता, ओं बीजम्, नमश्शक्तिः, महेन्द्रायेति कीलकम्। महेन्द्रसहितश्रीरामप्रीत्यर्थे जपे विनियोगः। सहस्रनयनं, अङ्गुष्ठाभ्यां नमः। देवं तर्जनीभ्यां नमः। सर्वदेवनमस्कृतं मद्ध्यमाभ्यां नमः। दिव्यवज्रायुधधरं अनामिकाभ्यां नमः। वन्देऽहं कनिष्ठिकाभ्यां नमः। तं शचीपतिं करतलकरपृष्ठाभ्यां नमः। एवं हृदयादिन्यासाः। भूर्भुव+बन्धः ॥ ध्यानम्—शचीपतिं सर्वसुपर्ववन्द्यं रक्षोनिहन्तारमसह्यवेगम्। श्रीरामसेवानिरतं महान्तं वन्दे महेन्द्रं धृतवज्रमीड्यम् ॥ लमित्यादिपञ्चपूजाः। अथ मूलमन्त्रः—सहस्रनयनं देवं सर्वदेवनमस्कृतम्। दिव्यवज्रायुधधरं वन्देऽहं तं शचीपतिम् ॥ यथाशक्ति जपः पुनः न्यासादिकं च ॥

अथ किष्किन्धाकाण्डस्य—

अस्य श्रीकिष्किन्धाकाण्डमहामन्त्रस्य अगस्त्य ऋषिः, अनुष्टुपछन्दः, सुग्रीवो देवता, सुंबीजम्, नमश्शक्तिः, सुग्रीवायेति कीलकम्। सुग्रीवससहितश्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः ॥ सुग्रीवः अङ्गुष्ठाभ्यां नमः। सूर्यतनयः

तर्जनीभ्यां नमः। सर्ववानरपुङ्गवः मध्यमाभ्यां नमः। बलवान् अनामिकाभ्यां नमः। राघवसखः कनिष्ठिकाभ्यां नमः। मां पायात्करुणानिधिः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादिन्यासाः। भूर्भुवस्सुवरों इति दिग्बन्धः। ध्यानम्—सुग्रीवमर्कतनयं कपिवर्यवन्द्य माराधिताच्युतपदांबुजमादरेण। दैत्यप्रहारकुशलं बलपौरुषाढ्य मैश्वर्यदाननिपुणं हृदि भावयामि। लमित्यादि-पञ्चपूजाः। अथ मूलमन्त्रः—सुग्रीवस्सूर्यतनयस्सर्ववानरपुङ्गवः। बलवान् राघवसखो मां पायात्करुणानिधिः ॥ पुनः हृदयादिन्यासाः ॥

अथ सुन्दरकाण्डस्य—

अस्य श्रीसुन्दरकाण्डमहामन्त्रस्य, हनुमानृषिः, अनुष्टुप् छन्दः, श्रीजगन्माता सीता देवता। श्रीं बीजम्, स्वाहा शक्तिः, सीतायै कीलकम्, श्रीसीतारामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः। सीतां अङ्गुष्ठाभ्यां नमः। विदेहतनयां तर्जनीभ्यां नमः। रामस्य दयिताऽनघां मध्यमाभ्यां नमः। हनूमता समाश्वस्तां अनामिकाभ्यां नमः। भूमिजां कनिष्ठिकाभ्यां नमः। शरणंभजे करतलकरपृष्ठाभ्यां नमः॥ एवं हृदयादिन्यासाः। भूर्भुवस्सुवरों इति दिग्बन्धः। ध्यानम्—सीतामुदारचरितां विधिमुख्यवन्द्यां देवीं त्रिलोकजननीं श्रितकल्पवल्लीम्। हेमासनस्थितिजुषं मणिहारमौलिभूषोज्वला मनुदिनं ललितां नमामि॥ लमित्यादि पञ्चपूजाः॥ अथ मूलमन्त्रः— सीतां विदेहतनयां रामस्य दयिताऽनघाम्।

हनूमता समाश्वस्तां भूमिजां शरणं भजे ॥ यथाशक्ति जपानन्तरं पुनर्हृदयादिन्यासाः ॥

अयं क्रमः सप्तकाण्डपारायणान्तर्गत सुन्दरकाण्डनित्यपारायणस्य कर्तव्यः ॥ यत्किञ्चिदिष्टसिद्धिं अनिष्टनिवृत्तिं वा समुद्दिश्य क्रियमाणस्य पृथक्सुन्दरकाण्डमात्रपारायणस्य तु अधस्तात् क्रमो लिख्यते ॥ (तथाहि)

अस्य श्रीसुन्दरकांडमहामन्त्रस्य, हनुमानृषिः । अनुष्टुप्छन्दः, महाप्रभावः श्रीरामो देवता । रां बीजम्, नमश्शक्तिः, रामायेति कीलकम् । श्रीरामचन्द्रप्रसादसिद्धिद्वारा + प्राप्त्यर्थे + निवृत्त्यर्थे जपे विनियोगः । उत्साहः अङ्गुष्ठाभ्यां नमः। पौरुषं तर्जनीभ्यां नमः । धैर्यं मद्ध्यमाभ्यां नमः । आनृशंस्यं कृतज्ञता अनामिकाभ्यां नमः । विक्रमश्च प्रभावश्च कनिष्ठिकाभ्यां नमः । सन्ति वानर राघवे करतलकरपृष्ठाभ्यां नमः । एवं हृदयादिन्यासाः ॥ दिग्बन्धः । ध्यानम्— स्रक्चन्दनाभरणभूपितभास्वराङ्गं वामोरुसंस्थितमहीतनयोपगूढम् । उत्फुल्लपद्मनयनं स्मितसुन्दरास्यं रामं कृपाजलनिधिं मनसा स्मरामि॥ लमित्यादि पञ्चपूजाः । अथ मूलमन्त्रः— उत्साहः पौरुषं धैर्यं आनृशंस्यं कृतज्ञता । विक्रमश्च प्रभावश्च सन्ति वानर राघवे ॥ पुनर्हृदयादिन्यासाः ॥

अथ ये तावत् श्रीरामचन्द्रप्रीतिद्वारा बन्धमोक्षमात्राभिलाषिणो विरक्तास्तेषां पृथक्सुन्दरकांडपारायणोपयोगि ऋषिच्छन्दोदेवतादि लिख्यते—

अस्य श्रीसुन्दरकांडाख्यमहोपनिषन्महामन्त्रस्य, जामदग्न्यऋषिः, अनुष्टुप्छन्दः, श्रीरामाख्यं तारकं ब्रह्म देवता । ओं बीजम्, माया शक्तिः, ईश्वर इति कीलकम्, श्रीरामाख्यपरब्रह्मणः प्रसादसिद्धिद्वारा मम बन्धमोक्षसिद्ध्यर्थे जपे विनियोगः । अन्तर्यामिणे अङ्गुष्ठाभ्यां नमः । अधिष्ठानाय तर्जनीभ्यां नमः। नित्यमुक्ताय मध्यमाभ्यां नमः । सर्वगताय अनामिकाभ्यां नमः । आनन्दरूपाय कनिष्ठिकाभ्यां नमः । तारकाय करतलकरपृष्ठाभ्यां नमः । एवं हृदयादिन्यासाः । भूर्भुवस्सुवरोमिति दिग्बन्धः । ध्यानम्—वैदेहीसहितं सुरद्रुमतले हैमे महामण्टपे मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम् । अग्रे वाचयति प्रभञ्जनसुते तत्वं मुनिभ्यः परं व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामळम् ॥ लमित्यादि पञ्च पूजाः । अथ मूलमन्त्रः—सर्वान्लोकान् सुसंहृत्य सभूतान् सचराचरान् । पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ॥ यथाशक्ति जपित्वा हृदयादिन्यासान् कृत्वा 'सीतारामौ तन्मयावत्र पूज्यौ जातान्याभ्यां भुवनानि द्विसप्त । स्थितानि च प्रहितान्येव तेषु ततो रामो मानवोमाययाऽधात् ॥ जगत्प्राणायात्मनेऽस्मै नमस्यां नमस्त्वैक्यं प्रवदेत् प्राग्गुणेन' ॥ इति साञ्जलिबन्धं पठित्वा (रामतापिन्यां तृतीयोपनिषत्) ततः पारायणं चरेत् । इति सर्वं शुभम् ॥

अथ युद्धकाण्डस्य—

अस्य श्रीयुद्धकाण्डमहामन्त्रस्य, विभीषणऋषिः, अनुष्टुप्छन्दः, विधाता देवता, विं बीजम्, नमश्शक्तिः, विधात्रे

इति कीलकम् । विधातृसेवितश्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः। विधाता अङ्गुष्ठाभ्यां नमः । समहादेवः तर्जनीभ्यां नमः । भक्तानामभयप्रदः मध्यमाभ्यां नमः। सर्वदेवप्रीतिकरः अनामिकाभ्यां नमः । भगवान् कनिष्ठिकाभ्यां नमः। भगवत्-प्रियः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादिन्यासानन्तरं दिग्बन्धः ॥ ध्यानम्—विधिं विधातारमहं स्तुवन्तं दशास्य-हन्तारमतीव भक्त्या। सर्वामरप्रीतिकरं सुशान्तं वन्दे सदा भूतनयेशभक्तम् ॥ लमित्यादि पञ्चपूजाः । अथ मूलमन्त्रः— विधाता स महादेवो भक्तानामभयप्रदः। सर्वदेवप्रीतिकरो भगवान् भगवत्प्रियः ॥ पुनर्हृदयादिन्यासाः ॥

अथोत्तरकाण्डस्य—

अस्य श्रीमदुत्तरश्रीरामायणमहामन्त्रस्य चतुर्मुखो भगवानृषिः, अनुष्टुप्छन्दः, श्रीरामचन्द्रः परमात्मा देवता। रां बीजम्, नमश्शक्तिः, रामायेति कीलकम्। श्रीरामचन्द्रप्रसाद-सिद्ध्यर्थे जपे विनियोगः। दाशरथये अङ्गुष्ठाभ्यां नमः । सीताकान्ताय तर्जनीभ्यां नमः। धर्मात्मने मध्यमाभ्यां नमः। खरहन्त्रे अनामिकाभ्यां नमः। सुग्रीवमित्राय कनिष्ठिकाभ्यां नमः। दशास्यहन्त्रे करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि-न्यासाः। दिग्बन्धः ॥ ध्यानम्— सुताभ्यां सेव्यमानांघ्रिं मुनिसङ्घैरभिष्टुतम् । यज्ञवेदिगतं रामं ब्रह्मादिस्तुतमाश्रये ॥ लमित्यादिपूजा । अथ मूलमन्त्रः—आदिकाव्यमिदं राम त्वयि सर्वं प्रतिष्ठितम् । नह्यन्योऽर्हति काव्यानां यशोभाग्राघवादृते ॥ पुनः हृदयादिन्यासः ॥

एवं न्यासादिकमनुष्ठाय तत इमे प्रार्थनाश्लोकाः पठनीयाः ॥ तथाहि— रामायणमहामन्त्रपठनेन सनातनः । परश्शिवस्सदा रामः प्रीत्या दद्यान्ममेप्सितम् ॥ ब्रह्मविष्णवीश्वरा नित्यं गृहे तिष्ठन्तु मे सदा । आकृष्टा राममन्त्रेण कारुण्यं महदास्थिताः ॥ घुटिकापादुकाद्यष्टसिद्धयो निधयो नव । पार्वती च रमा वाणी मातरस्सन्तु मे गृहे ॥ इति प्रार्थ्य । तत्तन्मतानुसारेण पूर्वपीठिकाश्लोकपठनपूर्वकं श्रीरामायणपारायणं कृत्वा यथासंप्रदायं समाप्त्यामपि मङ्गळश्लोकाः पठनीयाः ॥ इति सर्वं शिवम् ॥

इति श्रीरामोत्सवरत्नाकर रामतापिनी-
रामपटलादिसमुद्धृतः श्रीरामायण-
पारायणक्रमः समाप्तः ॥
श्रीरामश्शरणं मम ॥

॥ श्रीः ॥

॥ श्रीरामो जयति ॥

॥ श्रीजानकीचरणपङ्कजाभ्यां नमः ॥

अथ श्रीरामभक्तिकल्पलतायाम्

उत्तरफल्गुनीनक्षत्रपुण्यकालप्रयुक्तः

## ॥ सीतापूजाप्रकारः ॥

अगस्त्यः—

राजराज महाराज जनकानां कुलोद्वह ।
पावितोऽयं त्वया वंशो निमेराज्ञो महात्मनः ॥१॥

धन्यस्त्वं यस्य जगतां जननी पुत्रिकाऽभवत् ।
सा मूलप्रकृतिर्ज्ञेया सा माया सा श्रुतिः स्मृतिः ॥२॥

सा स्मृता सर्वपापघ्नी दृष्टा संपत्प्रदायिनी ।
प्रणताऽज्ञानशमनी स्तुता मोक्षप्रदायिनी ॥३॥

स्त्रीधर्मस्याखिलस्योपदेशार्थं सा वनं गता ।
लङ्कां गता महत् कष्टमन्वभूद्भुवनेश्वरी ॥४॥

तत्वज्ञा मुनयस्सर्वे वनेषु च मठेषु च ।
नगरेषु च विद्वांसः श्रुतिस्मृत्युक्तमार्गतः ॥५॥

कृत्वा प्रतिकृतिं तस्याः पूजयन्ति सुमैश्शुभैः ।
तेषां प्रसन्ना वरदा देवी प्रत्यक्षमेत्य च ॥६॥

अनुगृह्णाति बहुशः कांक्षितानि प्रदाय च ।
जानासि तां त्वं पुत्रीति अङ्कमारोपयस्यपि ॥७॥

आह्वयस्यपि वत्सेति * कदाचित्तर्जयस्यपि ।
निजनाथेन सानन्दं विहरत्यद्य सा सुखम् ॥८॥

तस्या गुणगणान् वक्तुं विशेषात् पुरतस्तव ।
अहं कथं नु शक्तस्स्यामपि वर्षायुतैरपि ॥९॥

आश्रितेषु च वात्सल्यं दीनेषु करुणाऽधिका ।
प्रभुत्वं सर्वलोकानां पातिव्रत्यगुणस्तथा ॥१०॥

तां विनाऽन्यत्र दृश्यन्ते नक्वापि भुवनत्रये ।
सा बालेति नमन्तव्या नस्त्रीति च निकर्षतः ॥११॥

तप्त्वा बहुतपस्सम्यगनेकयुगसङ्ख्यया ।
फलं तस्यानसूयाऽत्री सौभाग्यद्रव्यजातकम् ॥१२॥

प्राप्य तद्विनियोगार्थं चिरकालं तपोधनौ ।
प्रतीक्षेते स्म सीताया जन्मभूम्यास्तवाङ्गणे ॥१३॥

एतज्ज्ञात्वा तव सुता भर्त्रा सार्द्धं वनं गता ।
तयोराश्रममागाच्च वनवासनिभेन च ॥१४॥

तामागतां स्वमावासं अत्रिर्वीक्ष्य महातपाः ।
प्रशशंस प्रशस्तव्यां भर्तृपार्श्वगतामपि ॥१५॥

स्त्रीभिरेव हि संपूज्या स्त्रीति न्यायानुसारतः ।
प्रेषयामास तां पत्या अनसूयासमीपतः ॥१६॥

---

* आर्षस्सन्धिः ॥

तां वन्दमानामाश्लिष्य स्वाङ्कमारोप्य भक्तितः।
स्तुत्वा तद्गुणसामग्रीमनन्यस्त्रीजनस्थिताम् ॥१७॥

पूतां निजां तनुं मेने वाचं चापि तपस्विनी।
श्रोत्रं चापि तथा कर्तुं तद्वाचां श्रवणेन च ॥१८॥

तस्याः स्वयंवरकथां शुश्राव कथितां तया।
अथ सा पलिता वृद्धा कंपमानाङ्गकाऽपि च ॥१९॥

केशान्प्रसाधयामास विन्यस्याऽम्लानमालिकाः।
धारयित्वा दिव्यवस्त्रं कञ्चुळीमपि कानकीम् ॥२०॥

दिव्यगन्धैर्लेपयित्वा शुभैर्मलयजद्रवैः।
भूषयित्वा च सर्वाङ्गं दिव्यैराभरणैरपि ॥२१॥

दृष्ट्वा लोकोत्तरं रूपं चक्षुर्मेने कृतार्थितम्।
भर्तुस्समीपे तां देशे स्थापयित्वा तथाविधाम् ॥२२॥

तद्द्वन्द्वं वीक्ष्य तपसस्साफल्यं सा ह्यमन्यत।
एवं तपस्विनां वर्यास्त्रिमूर्तिजनकोऽप्यसौ ॥२३॥

अत्रिस्तां पूजयामास किं पुनः प्राकृतो जनः।
अन्यां शृणु प्रवक्ष्यामि तत्प्रभावाश्रयां कथाम् ॥२४॥

यस्याः श्रवणमात्रेण नरः पापात् प्रमुच्यते।
कान्यकुब्जे द्विजः कश्चिदभवद्धर्मतत्परः ॥२५॥

वेदवेदाङ्गतत्वज्ञो धर्मशील इति श्रुतः।
तस्य भार्याऽभवत्साध्वी सुमुखी नाम नामतः ॥२६॥

ह्रीश्रीकीर्तिसमा रूपे पातिव्रत्यपरायणा।

तावन्योन्यानुरागार्द्रौ समेतौ सर्वसंपदा ॥२७॥

गृहस्थधर्मानखिलान् सश्रद्धावन्वतिष्ठताम् ।
विदितं खलु नारीणा मनूनानामपि श्रिया ॥२८॥

दरिद्रस्यापि भवनं पितुश्चित्ताय रोचते ।
सर्वसंपत्समृद्धायाः सुमुख्या भर्तृवेश्मनि ॥२९॥

मासं पितुर्गृहे वासो वत्सरे वत्सरेऽभवत् ।
कान्यकुब्जान्तिके ग्रामे पञ्चयोजनदूरगे ॥३०॥

तस्याः पिताऽवसद्विप्रो भारद्वाजाभिधानकः ।
स धनाढ्योऽभवत्पूर्वं वाणिज्ये धूर्तसख्यतः ॥३१॥

दरिद्रोऽभूत् कुटुंबस्य भरणेऽशक्ततां गतः ।
स चिन्तयित्वा स्वसुतां धनाढ्यामनपत्यकाम् ॥३२॥

अभ्येत्य तस्याः किमपि भर्तुरज्ञातमेव च ।
गृहीत्वाऽप्यागमिष्यामि धनधान्यादिकं त्विति ॥३३॥

जामातुर्गेहमगम दुभाभ्यां पूज्यते स्म च ।
अथ प्राह मिथः पुत्री मुषित्वा दिनपञ्चकम् ॥३४॥

भारद्वाजः—

वत्से धन्याऽसि सुमुखि पत्याऽनेनात्र सङ्गता ।
महाधनाढ्यस्ते भर्ता गरिष्ठश्च गुणैरपि ॥३५॥

त्वत्पितृत्वेन तनये अहमप्यस्मि पुण्यवान् ।
किञ्चिद्वक्तुमिहेच्छामि वचोभर्तुरसान्निधौ ॥३६॥

विदितं ते धनाढ्योऽह मासं यक्षाधिपोपमः ।

वाणिज्येनाद्य मे सर्वं धनं नष्टं कुदैवतः ॥३७॥
कुटुंबभरणं कष्टं जायतेऽद्य दिनेदिने ।
साद्ध्या अपिच ते मातुर्वाचो मे हृदयच्छिदः ॥३८॥
भ्रातॄणां तव बालाना मसह्यं रोदनं सदा ।
जिघृक्षुः किमपि त्वत्तः प्राप्तोऽस्मि भवनं तव ॥३९॥
यथात्रा मन्यसे वत्से माचिरं क्रियतां वचः ।

सुमुखी—

तात किं मन्यसे मां त्वं हस्तन्यस्तधनां सदा ॥४०॥
व्ययस्य कस्यचिद्धेतो स्त्वज्ञामात्राऽर्पिते धने ।
तत्र त्र्यंशान् व्ययीकृत्य पादमेकं प्रशेषये ॥४१॥
एवं मिळितमेतत्ते कार्यार्थमददां पुरा ।
याचस्यद्य हि तत्स्मृत्वा नास्ति काचोऽद्य मे वशे॥४२॥
एकतोऽनेन जिह्वेमि खिद्येऽहं चान्यतः पितः ।
तव दारिद्र्यमोक्षाय यत्कर्तव्यं मया भवेत् ॥४३॥
तदद्योपदिश त्वं मे कर्तास्मि निखिलं तथा ।

अगस्त्यः—

इति पुत्र्या वचः श्रुत्वा पिताऽस्याः प्रेममेदुरम् ॥४४॥
क्षणं दुरात्मा सञ्चिन्त्य स्वभावक्रूरया धिया ।
दारिद्र्यादपथारोही वाचमेतामुवाच ह ॥४५॥

भारद्वाजः—

मिषेण केनचिद्वत्से नेष्ये त्वां मामकं गृहम् ।

तत्र गत्वा ततोऽज्ञात्ते महामूल्यं तु भूषणम् ॥४६॥

आदाय तच्च विक्रीय कृच्छ्रं तात्कालिकं मम
अपनेष्यामि सुभगे कृतार्थः स्यामहं ततः ॥४७॥

पृच्छते त्वं वक्ष्यसे च भर्त्रे चोरहृतं त्विति ।
दिनानि पञ्चषाण्येष कुपितः स्यात् त्वयि ध्रुवम् ॥४८॥

क्रमेण स प्रसन्नस्स्या देवं कुरु च मत्कृते ।

अगस्त्यः—

एतच्छ्रुत्वा पितुर्वाक्य मनुमेने तथाऽस्त्विति ॥४९॥

स्त्रीस्वभावाच्च पितरि प्रेमभाराच्च सा सुता ।
भारद्वाजस्ततो धर्मशीलं प्राप्य विमूढधीः ॥५०॥

सुतस्य कर्णवेधाय नेष्यामि तनयामिति ।
प्रार्थयामास झटिति गन्तव्यमिति चाब्रवीत् ॥५१॥

धर्मशीलः—

आगतायास्सुतायास्ते स्थित्वा तव तु सद्मनि ।
द्वावेव हि गतौ मासौ पुनरेनां निनीषसि ॥५२॥

अत एनां पुनर्गन्तुं नाभ्यनुज्ञातुमुत्सहे ।
गताऽऽगतेन पुत्र्यास्ते धर्मो मे भज्यते मुहुः ॥५३॥

भारद्वाजः—

दिवसान् सप्त जामातः क्षमस्व कृपया मयि ।
अष्टमे दिवसे नूनं प्रापयिष्यामि तां पुनः ॥५४॥

गृहं शून्यमिव स्यान्मे विना तां शुभकर्मणि ।

अगस्त्यः—

अभ्यनुज्ञाप्य कथमप्येवमेनं दुराशयः ॥५५॥
धृतसर्वाभरणया प्रतस्थे सुतया सह ।
तां तथा नयतः पद्भ्यां मार्गे कान्तारसंश्रये ॥५६॥
अर्द्धयोजनमात्रे च पथश्शेषे स्थितेऽपि च ।
अस्तमभ्यगमत्सूर्यो दिशश्च तिमिरावृताः ॥५७॥
पितुः पार्श्वगताऽप्येषा वेपतेस्माधिकं भिया ।
सङ्घीभूतास्ततश्चोरा स्तयोरन्तिकमागताः ॥५८॥
तान् दृष्ट्वा सुमुखी सद्यो न्यपतन्मूर्च्छिता भुवि ।
स्वहस्तास्थितदंडेन भारद्वाजोऽपि तान् क्रुधा ॥५९॥
यदा जघान ते सद्यः खड्गैः कुन्तैर्हुलैरपि ।
आहत्य तं व्यसुं कृत्वा सुमुखी माक्रमंस्ततः ॥६०॥
सुमुखी पितरं दृष्ट्वा हतं चोरांश्च सङ्गतान् ।
चुक्रोश बहुधाऽप्युच्चै रुरोद पतिता भुवि ॥६१॥
स्मृत्वा निजं चाविनयं भर्तृद्रोहं च दुःखिता ।
तानब्रवीन्महाभागास्सर्वान् व शिरसा नमे * ॥६२॥
मा मां घ्नत शरीरं मे न यूयं स्प्रष्टुमर्हथ ।
अहं तु सर्वाभरणा न्यामुच्य प्रददामि वः ॥६३॥
इत्युक्ते तैरनुमते यदा सा भूषणावलिम् ।
अवमोक्तुं समारेभे तदा सर्वेऽपि शुश्रुवुः ॥६४॥

---

* आत्मनेपदमार्षम् ॥

आगच्छतः खुररवं वाजिनः कस्यचित् प्रभोः ।
तावत्ते भीतितश्चोरा आदाय सुमुखीं द्रुताः ॥६५॥

विक्रोशन्तीं शपन्तीं च तीरमंबुनिधेर्गताः ।
तावत् सा मूर्च्छिता बाला नात्मानं नापि वा जगत् ॥

जज्ञे मृतामिव च तां भूमौ विन्यस्य चोरकाः ।
हृत्वाऽऽभरणजालानि निश्शेषाणि त्वरान्विताः ॥६७॥

क्षिप्त्वा तां च पयोराशौ यथेष्टं प्रययुस्ततः ।
अनीक्षमाणा शरणं प्लवन्ती सा च सागरे ॥६८॥

पिबन्ती तोयधेस्तोयं मज्जनोन्मज्जनादिभिः ।
यदृच्छयाऽऽगतं काष्ठमालंब्य जलधौ प्लुतम् ॥६९॥

तरङ्गवाताहतिभिर्भ्राम्यमाणाऽभ्रमन्मुहुः ।
द्वीपं कञ्चिदनुप्रापद्दैवात् परमदुःखिता ॥७०॥

चिरं समुद्रप्लवनात् क्षुधा च परिपीडिता ।
रुदती स्वमनुस्मृत्य भर्तृद्रोहोद्यमं सती ॥७१॥

तीरे निर्विविशे सिन्धोः पदाच्चलितुमक्षमा ।
सूर्योऽप्युदयमापेदे द्रष्टुं तस्या इव स्थितिम् ॥७२॥

स्नानायागान्महावृद्धस्तत्र कश्चिन्महामुनिः ।
तां दृष्ट्वा पतितां तत्र मुनिर्विद्युल्लतोपमाम् ॥७३॥

काऽसि त्वमिति पप्रच्छ कारुण्यार्द्रितमानसः ।
सा चोत्थाय शनैर्वीक्ष्य तं प्रणम्य सुदुःखिता ॥७४॥

आचचक्षे स्ववृत्तान्तं संग्रहेण तपस्विने ।

सच ध्यात्वा मुहूर्तं तु क्रोधकारुण्ययन्त्रितः ॥७५॥

उवाच सुभगे भर्तुर्द्रोहस्येदं फलं तव ।
विधिना शिक्षिताऽसि त्वं सानुकंपोऽस्म्यतस्त्वयि ॥

एह्याश्रमं मम सुखं कञ्चित्कालं वसात्र च ।
पुष्णामि त्वां यथाशक्ति काले भर्तारमाप्स्यसि ॥७७॥

इत्युक्त्वा समुनिः स्नात्वा तां निनाय स्वमाश्रमम् ।
रक्ष्यमाणा च पुत्रीव साऽपि भर्तृपदस्मृतिः ॥७८॥

प्रयता नियताऽऽहारा तत्राश्रमपदेऽवसत् ।
धर्मशीलस्तु संप्रेष्य भार्यां पितृगृहं प्रति ॥७९॥

सेहे कालं माससमात्रं ततः खिन्नो विना तया ।
आप्तं संप्रेषयामास श्वशुरं प्रति पूरुषम् ॥८०॥

भारद्वाजस्य भार्याद्याः प्रोचुस्तं पुरुषं प्रति ।
जामातुस्सदनं प्राप्तो नाऽद्याऽपि विनिवृत्तवान् ॥८१॥

एतच्छ्रुत्वा धर्मशीलः पुरुषस्य मुखात्ततः ।
चिन्तां बहुविधां कृत्वा तयोरन्वेषणोद्यतः ॥८२॥

अटित्वा सुबहून् देशान् ग्रामाणि * नगराणि च ।
क्रमेण दण्डकारण्यं प्राप पापविवर्जितः ॥८३॥

तत्राऽपि बहुशो विप्रस्सञ्चरंस्तत्र तत्र च ।
आश्रमं मुनिवर्यस्य सुतीक्ष्णस्यागमत् क्रमात् ॥८४॥

तत्रास्य रचितं सम्यगातिथ्यं मुनिशिष्यकैः ।

---

* आर्षं नपुंसकलिङ्गम् ॥

विश्रम्य याममात्रं स सुतीक्ष्णं वाक्यमब्रवीत् ॥८५॥

धर्मशीलः—

भगवन् धर्मशीलाख्यो विप्रोऽहं कान्यकुब्जगः ।
मम भार्या समं पित्रा गता पितृगृहं प्रति ॥८६॥

तस्य ग्रामो मम पुरात् पञ्चयोजनदूरतः ।
मासमात्रे गते कालेऽप्यागतौ नच तौ पुनः ॥८७॥

ततोऽहं चिन्तयाऽऽक्रान्तः प्रैरयं श्वशुरं प्रति ।
क्रमप्याप्ततरं वृत्तमधिगन्तुं विशेषतः ॥८८॥

विज्ञाय तौ द्वावपि न तत्रागातामिति प्रभो ।
ततोऽहं सुबहून् देशा नन्विष्यंस्तावुभावगाम् ॥८९॥

क्रमेणात्रागमं साधो परिश्रान्तोऽस्मि सर्वथा ।
इतःपरं नशक्नोमि चलितुं हि पदात्पदम् ॥९०॥

सर्वज्ञस्त्वं मुनिश्रेष्ठ वेत्सि नूनं तयोर्गतिम् ।
आज्ञापय यथेष्टं मां यत्कर्तव्यं मया भवेत् ॥९१॥

यथा तयोर्मया सार्धं भवेदेव समागमः ।

सुतीक्ष्णः—

माभैषीर्भूसुरश्रेष्ठ ज्ञानतोऽज्ञानतोऽपिवा ॥९२॥

स्वेनानुभवनीयं स्यात् स्वकृतं सर्वमेव हि ।
पूर्वजन्मनि विप्रोऽभूस्तदा ते दुष्कृतं महत् ॥९३॥

पितृष्वसुस्सुतां भर्तुर्गृहं गन्तुं कृतत्वराम् ।
निषिद्ध्य गृहमानीय तां त्वं स्वार्थे न्यवेशयः ॥९४॥

तस्या भूषणजालानि बलात्सर्वाण्यपाहरः ।
तस्योदर्कः कर्मणोऽद्य त्वयाऽयमनुभूयते ॥९५॥
किं कर्तव्यं नदुःखान्तो जन्मन्यस्मिन् हि विद्यते ।

धर्मशीलः—

भगवन् ब्रह्महत्यादेरपि पापस्य निष्कृतिः ॥९६॥
भवादृशैः परिप्रोक्ता जगदुद्धरणेच्छुभिः ।
तथाहि सति पापस्य मत्कृतस्यापि निष्कृतिः ॥९७॥
कथं नशक्यतां वक्तुं भवता सर्वशक्तिना ।
शरणागतमेनं त्वं कृपया रक्ष पावन ॥९८॥
पश्चात्तप्तोऽस्मि सत्येन पुरतस्ते ब्रवीम्यहम् ।

अगस्त्यः—

एतच्छ्रुत्वा वचस्तस्य सुतीक्ष्णो मुनिसत्तमः ॥९९॥
क्षणं ध्यात्वा प्रसन्नात्मा धर्मशीलमथाब्रवीत् ।

सुतीक्ष्णः—

वक्ष्यामि शृणु विप्रेन्द्र रहस्यमतिपावनम् ॥१००॥
धर्मसंस्थापनार्थाय रावणस्य वधाय च ।
विष्णुः स्वार्धांशतो जज्ञे रामो दशरथात्मजः ॥१०१॥
लक्ष्मणो भरतशत्रुघ्नौ * जाता अर्धांशभागतः ।
विष्णोर्वक्षःस्थलस्थाना लक्ष्मीर्भर्त्रानुगुण्यतः ॥१०२॥
जाताऽर्धांशेन सीतेति जनकस्याद्धुरावनेः ।

---

* अक्षराधिक्यमार्षम् ॥

अन्यार्धांशेन कलया ऊर्मिळा जनकौरसी ॥१०३॥

माण्डवी श्रुतकीर्तिश्च कुशध्वजसुते उभे ।
जाताः पत्न्योऽभवंस्तेषां धर्मान् शिक्षयितुं स्त्रियाः ॥

तासु सीता परा शक्तिः परब्रह्मस्वरूपिणी ।
प्रतिष्ठा रामचंद्रस्य सर्वधर्मप्रवर्तिका ॥१०५॥

मूलप्रकृतिरेषाऽभूत् जगत्सृष्टौ पुरेशितुः ।
श्रीरामस्य स्वपादाब्जनतेभ्यश्श्रेयसोऽर्पणे ॥१०६॥

एषैव हेतुर्नैषा चेत् किं कुर्यान्निर्गुणः पुमान् ।
सकृन्नमस्कृता ह्येषा प्रारब्धाद्यंहसां त्रिकम् ॥१०७॥

सद्यो नाशयते नृणां वर्धयेच्च श्रियं गृहे ।
विश्लिष्टान् योजयेद्बन्धून् नष्टं प्रापयते पुनः ॥१०८॥

विद्याश्चतुर्दशाधत्ते ब्रह्मज्ञानं च यच्छति ।
स्मृताऽपि पापमाहन्ति पूजिता भक्तितस्सुमैः ॥१०९॥

ब्रह्मलोकान्तलोकेषु दत्ते सा कामचारणम् ।
तया सहैव संपूज्यः श्रीरामः करुणानिधिः ॥११०॥

तदा सा गुणभूता सत्यर्पये दीप्सितं नृणाम् ।
पृथगेषाऽपि संपूज्या सर्वश्रेयोऽभिवृद्धये ॥१११॥

तस्मात् त्वं स्वगृहं गत्वा शक्त्या पूजय जानकीम् ।
सा प्रसन्ना वरान् दद्यात् पत्न्या ते सङ्गमो भवेत् ॥

अगस्त्यः—

इति वाचं सुतीक्ष्णस्य श्रुत्वा स द्विजसत्तमः ।

शिरस्यञ्जलिमाधाय प्रणिपत्येदमब्रवीत् ॥११३॥

धर्मशील:—

नमस्तेऽस्तु मुनिश्रेष्ठ नमस्ते दीनवत्सल ।
वचसैव तवानेन शोको मम विनाशितः ॥११४॥

श्रुतं मया मुनिश्रेष्ठात् कस्माच्चित्गृहमागतात् ।
साक्षाद्विष्णुः स्वयं रामः सीता लक्ष्मीरिति स्फुटम् ॥

किन्तु तन्महिमाऽद्यैव तव वक्त्रांबुजाच्छ्रुतः ।
धन्योऽस्मि कृतकृत्योऽस्मि शिष्योऽस्मि भवतस्सदा ॥

कदा कथंवा सा पूज्या विधानेनापि केन वा ।
सर्वं मे शंस भगवन् मां कृतार्थय सर्वथा ॥११७॥

सुतीक्ष्ण:—

वैशाखोत्तरफल्गुन्यां जानकीपूजनं कृतम् ।
सूते यत्तत्फलं वक्तुं सैव जानाति जानकी ॥११८॥

अन्येष्वखिलमासेषु पूजनं सर्वसिद्धिदम् ।
ऋक्षे चोत्तरफल्गुन्यां किन्तु तत् बहुपुण्यतः ॥११९॥

यस्मिन्दिने तु मद्धाह्नं व्याप्नोत्युत्तरफल्गुनी ।
तद्दिनं तु प्रशस्तं स्यात् सीतापूजनकर्मणि ॥१२०॥

दिनद्वयेऽपि व्याप्तिश्चेत् ग्राह्या स्यादधिका यदा ।
पूर्वविद्धा प्रशस्ता स्याद्यदि व्याप्तिस्समा द्वयोः ॥१२१॥

अतर्कितोपेतविपद्व्यपनोदाय मानवैः ।
भृगुवारे पूजनीया नचेदृक्षं समीपगम् ॥१२२॥

एकाग्रमानसैर्भक्त्या पूज्यते मैथिली यदि ।
आत्मानं दर्शयित्वा सा वरानिष्टान् प्रयच्छति ॥१२३॥

साकं स्वभर्त्रा सेदानी मयोद्ध्या मधितिष्ठति ।
भुञ्जाना मानुषान् भोगान् सर्वकामसमृद्धिनी ॥१२४॥

तथाऽपि स्वाश्रितान् भक्ता ननुगृह्णाति सर्वथा ।
पतिपार्श्वस्थिताऽप्येषा पूजास्थानेषु वर्तते ॥१२५॥

गृहमद्ध्याङ्गणे पूजामण्टपं कारयेद्बुधः ।
कदलीनालिकेरादिफलबृन्दैश्च शोभितम् ॥१२६॥

तथा पट्टवितानाढ्यं मध्ये वेदिकया युतम् ।
तत्र सिंहासने दिव्ये तण्डुलान् प्रस्थसंमितान् ॥१२७॥

न्यस्य पद्मं लिखित्वाऽत्र कुंभं रजतनिर्मितम् ।
मुक्तामणिभिरापूर्य तण्डुलैर्वाऽत्र निक्षिपेत् ॥१२८॥

हरिद्राक्तं नालिकेरं तत्रोदक्छिखमर्पयेत् ।
तत्र सीताप्रतिकृतिं काञ्चनीं वाऽपि राजतीम् ॥१२९॥

यद्वा दर्भमयीं वाऽपि न्यस्य प्राणप्रतिष्ठया ।
तत्र सीतां समावाह्य पूजयेच्च यथाविधि ॥१३०॥

रक्तपुष्पाणि वर्ज्यानि रक्तचन्दनमेव च ।
पायसाऽपूपदध्यन्नगुडान्नादि निवेदयेत् ॥१३१॥

## अथ पूजाविधिः ॥

आदौ— जानकीं पूजयिष्यामि तत्सान्निध्यं भविष्यति ।
यत्नतो वह शेष त्वं तत्रापि सुकृतं भवेत् ॥ शेषाय नमः

[ पीठाधस्स्थले भूमौ ] सर्वदिक्षु व्याप्तिमतीं अर्चयिष्यामि जानकीम् । अपसर्पत तद्यूयं नमोवोऽस्तु च दिग्गजाः ॥ ऐरावताय नमः इत्याद्यष्टासु दिक्षु * अष्टापि दिग्गजान् पूजयेत् । ब्रह्मादिलोकपाला वः करोमि नमसां शतम् । वीक्षध्वं खे सन्निहिताः सीतापूजां मया कृताम् (ऊर्ध्वं) ब्रह्मादिभ्यो लोकपालेभ्यो नमः । अथ ध्यानम्--सिंहासनसमारूढां शुक्लचन्दनचर्चिताम् । किरीटाङ्गदकेयूरकटकादिविभूषणैः ॥ भूषितामखिलैर्मन्दस्मिताञ्चितमुखाम्बुजाम् । ऊर्मिळाकरपाथोजधृतश्वेतातपत्रकाम् ॥ माण्डवीश्रुतकीर्तिभ्यां वीज्यमानप्रकीर्णकाम्। वनदेवतया चापि विजयाभिधया पुरः ॥ स्थितया रचिताञ्जल्या विनयेनोपसेविताम् । राजराजेश्वरीं देवीं ध्यायामि जनकात्मजाम् ॥ इति ध्यानम् ॥ आवाहये त्वां पूजार्थं जनकेश्वरपुत्रिके। भर्तृपार्श्वगताऽपि त्व मत्र सन्निहिता भव ॥ अस्यां प्रतिमायां सर्वलोकमातरं सर्वचराचरात्मिकां साङ्गां सपरिवारां सीतामावाहयामि ॥ (मध्ये) ऊर्मिळां पृष्ठे आवाहयामि । दक्षिणतो माण्डवीं, वामतः श्रुतकीर्तिं, पुरतस्सीताभिमुखीं सविनयाञ्जलिबन्धां विजयामावाहयामि । (इतःपरं प्रत्युपचारं साङ्गायै सपरिवारायै सीतायै नमः इति पठनीयम्) सार्वभौमप्रिये मातः नानारत्नविचित्रितम् । आसनं फणिभिर्दिव्यैः धृतमध्यास्यतां त्वया ॥ आसनम् ॥ सुवर्णपात्रे निक्षिप्तमानीतं सरयूजलम् । मम पावनताहेतोः कुरु पादावनेजनम् ॥ पाद्यम् ॥

---

* ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तस्सार्वभौमस्सुप्रतीकश्च दिग्गजाः ॥

रविमण्डलमद्ध्यस्थहिरण्मयवपुःप्रिये । अर्घ्यं ददामि ते मातर्मल्लिकावासितं जलम् ॥ अर्घ्यम् ॥ मद्दत्तजलबिन्दुस्ते कुक्षिं गच्छति चेत्तदा । तापत्रयं विनश्येन्मे तस्मादाचमनं कुरु ॥ आचमनीयम् ॥ शर्करागोघृतक्षौद्र दुग्धनानाफलैर्युतम् । पञ्चामृतं मया दत्तं तेन स्नाहि शुभाय मे ॥ पञ्चामृतस्नानम् ॥ कामधेनूद्भवैर्दुग्धैः स्नापिताऽसि सुरैर्मुहुः । अलज्जं स्नापये सीते पयोभिर्मम गोभवैः ॥ क्षीराभिषेकम् ॥ सरयूयमुनागङ्गागौतमीसह्यजादितः । नीताभिर्मन्त्रपूताभिरद्भिः स्नाहि महीसुते ॥ शुद्धोदकस्नानम् ॥ (अस्मिन्नवसरे श्रीसूक्तं, भूसूक्तं, 'उद्धन्यमानमस्याअमेद्ध्यं' इत्यनुवाकः, बृहत्साम बृहद्रथन्तरसाम शुद्धसामानि, सुन्दरकाण्डस्थ हनुमत्कृत सीतादर्शन (१५) सर्गश्च पठनीयानीति मुनीनां संप्रदायः) वनवासेऽपि वासांसि दत्तानि श्वशुरेण ते । मत्पूजासमये मातः वस्व चीनांशुकं मम ॥ वस्त्रम् ॥ तव कञ्चुलिकां रत्नखचितां मातरर्पये । पापकञ्चुकनिर्मोक्षं फलं मे देहि जानकि ॥ कञ्चुकम् ॥ अनसूयाङ्गरागेण वासितेऽम्ब तवाङ्गके । कर्पूरवासितं लिम्प सितं मलयजद्रवम् ॥ चन्दनम् ॥ कस्तूरीतिलकं फाले कुरु मैथिलि मत्कृते । सकळङ्केन्दुशोभां ते तेन धत्तां मुखाम्बुजम् ॥ कस्तूरीतिलकम् ॥ मातर्ललाटे काश्मीरजातकुङ्कुमपङ्कतः । सीमन्ते च श्रियै देवि तिलकं कारयामि ते ॥ कुङ्कुमतिलकम् ॥ भूपालदुहिताऽसि त्वं महिषी चक्रवर्तिनः । धृत्वा विभाहि मद्दत्तहारकुण्डलकङ्कणम् ॥ आभरणानि ॥ अक्षतान् कुङ्कुमोन्मिश्रान् शिक्षिताशरनायके । सिन्दूराञ्चितसीमन्तमध्ये तेऽम्ब निवेशये॥

अक्षतान् ॥ मालतीमाधवीमल्ली केतकीजातिपङ्कजैः। पूजये पुरुहूतादिपूज्यां त्वां पृथिवीसुते ॥ पुष्पाणि समर्पयामि ॥

अथाङ्गपूजा—

पाकशासनपूजितायै नमः पादौ पूजयामि। पार्थिवव्यञ्जनान्वितायै नमः पादरेखाः पू। पल्लवमृदुपदायै नमः पादतलं पू। प्रणतहार्दतमोऽपहायै नमः पादनखान् पू। गुणिकृतालयायै नमः गुल्फौ पू। गङ्गाप्रसादनपरायै नमः जङ्घायुगळं पू। आजानशुद्धचरितेड्यायै नमः जानुनी पू। उरुविक्रमपतिनन्दितायै नमः ऊरू। घटिताशरपतिमृत्यवे नमः कटिं पू। आकाशमध्यायै नमः मध्यं पू। खलारातिभयङ्कर्यै नमः मध्यविद्योतमानमेखलादाम पू। किङ्करीकृतपङ्कजासनायै नमः मेखलास्थितकिङ्किणीजालकं पू। ब्रह्माण्डकोटिनिलयोदरायै नमः उदरं पू। पद्मनाभप्रियसख्यै नमः नाभिं पू। रामार्पितहृदयायै नमः रोमावळिं पू। अश्वस्तनिकमुनिमोक्षदायै नमः स्तनौ पू। कण्ठालंबितखरारातये नमः बाहू पू। जटायुर्जीवितप्रदायै नमः करतले पू। आर्ताभयदानपरायै नमः अभयमुद्रां पू। दासीकृतकपिप्रवरायै नमः वरमुद्रां पू। पद्मगन्धिन्यै नमः करस्थित पद्मं पू। रक्षःप्राणापहारहेतवे नमः हारावळिं पू। अमङ्गळकलिदोषध्वंसिन्यै नमः मङ्गळसूत्रं पू। कण्ठजितकोकिलायै नमः कण्ठं पू। मुखविजितचन्द्रायै नमः मुखं पू। श्रितजनापसारितकृतान्तायै नमः दन्तान् पू। शिष्टौघसन्नुतायै नमः ओष्ठौ पू। भक्तजनहृदयकृतवासायै नमः नासां पूजयामि। कवितारसपानासक्तायै नमः नासामौक्तिकं पू

श्रीरामचुंबितमुख्यै नमः कपोलौ पू । नित्यसुवासिन्यै नमः ताटङ्के पू । मुक्तावळीपूजितायै नमः मुक्तामयवाळिकां पू । त्रिभुवननेत्रैच्य नमः नेत्रे पू । अपांगभोंषितायै नमः अपाङ्गौ पू । वशीकृतनाथहृदयायै नमः कटाक्षान् पू । शिवचापारोपणपणायै नमः भ्रूचापौ पू । विश्राणितसर्वकर्मफलायै नमः फालं पू । जनककुलतिलकभूतायै नमः कुङ्कुमतिलकं पू । दशशिरश्शिरःकर्तनप्रियायै नमः शिरः पू । पुष्पकारूढायै नमः चिकुरस्थितपुष्पाणि पू । वाणीपतिवन्दितायै नमः वेणीं पू । करीन्द्रकरसक्थये नमः किरीटं पू । आलिङ्गितवीररामायै नमः अभ्रस्थितविद्युल्लतोपमकान्तिं पू । पालितपरमापराधिकायै नमः कृपालहरीं पू । हनूमतोरक्षितराक्षसीकायै नमः दीनशरण्यतां पू । तृणान्तरितरावणायै नमः पातिव्रत्यधर्मं पू । अनभ्युपगतहनुमत्स्पर्शायै नमः भर्तृभक्तिं पू । जन्मान्तरकृतपापानुवादिन्यै नमः मानुषभावानुवर्तनं पू । दुःखेऽपि शुचिस्मितायै नमः नित्यप्रसन्नतां पू । परुषवचोधिक्कृतलक्ष्मणायै नमः देवकार्यधुरन्धरतां पू । कृतरावणहितोपदेशायै नमः शत्रोरपि हितपरतां पू । गर्वरहितायै नमः सर्वाण्यङ्गानि सर्वांश्च गुणान् पू । कमलासनप्रसुवे नमः कमलानि समर्पयामि । कुवलयाधिपवल्लभायै नमः कुवलयानि स । हेमवल्लीसमाङ्गकायै नमः मल्लीकुसुमानि सम । ख्यातिविलसितायै नमः जातिपुष्पाणि सम । श्रितकंपहरायै नमः चंपकमालां सम । पल्लवकोमळपादायै नमः बिल्वपत्राणि सम । अतुलप्रभावायै नमः तुळसीमञ्जरीरर्पयामि । पर्वामृतांशुवदनायै नमः सर्वाणि पुष्पाणि समर्पयामि । अथ

धूपदीपादयो नीराजनान्ता उपचाराः स्त्रीभिस्तूष्णीं पुंभिस्तत्तन्मन्त्रैश्च कर्तव्याः । उत्थितामग्निमध्यात् त्वां पुष्पवर्षैर्मुदा सुराः । आनर्चुरहमप्यद्य मन्त्रपुष्पं ददामि ते ॥ मन्त्रपुष्पम् । मातः प्रदक्षिणीकुर्वे त्वामद्य जनकात्मजे । मम प्रदक्षिणं सर्वमायुस्सत्वं बलं कुरु ॥ प्रदक्षिणानि ॥ प्रणिपातप्रसन्नेति त्वमागस्यपि घुष्यसे । नित्यं शतापराधोऽहं वन्देऽम्ब त्वां प्रसादयन् ॥ करुणाकरचित्तायै कल्याणनिधये नमः । काकुत्स्थवल्लभायै ते कमलायै नमो नमः ॥ नमस्कारान् ॥ विस्मृत्य मातरमपि त्वामेव विचराम्यहम् । श्रुतिं स्मृतिं च जानानोऽप्यकार्ये सततं रमे ॥ काकं तं रक्षितवतीं त्वामेव शरणं श्रये । मद्रक्षा ते भरो मातर्नोच्यतेऽतः परं मया ॥ देहेंबाऽऽदेहमखिलं सुखं यत् कांक्षितं मम । स्वं पदं प्रापयान्ते मां नमस्ते जगदंबिके ॥ इत्यपराधक्षमापणम् । चक्रवर्तिप्रिये छत्रं चन्द्रमण्डलसन्निभम् । धारये ते सर्वरत्नजालकं सुखमास्यताम् ॥ छत्रम् ॥ स्वर्णपुङ्खं शुभ्रवर्णं चामरद्वयमादरात् । धुनोमि त्वामुभयतः प्रसीद परमेश्वरि ॥ चामरयुग्मम् । आरोहांब मया दत्तां शिबिकां रत्नभूषिताम् । अहं मदीयसहितो वहाम्येनां यथासुखम् ॥ शिबिकाम् ॥ ऊर्मिळाऽऽद्यैः स्वीयजनैस्सेव्यमानाऽद्य सर्वतः । आन्दोळिकां ममेमां त्व मातिष्ठ कृपया मयि ॥ आन्दोळिकाम् ॥ किन्नर्यो रक्तकण्ठ्यस्ते गायन्ति चरितं सदा । गायामि रामं प्रति ते मधुरं धर्मकीर्तनम् । (आरण्यकाण्डे नवमस्सर्गः । ) गीतम् ॥ दृष्टवत्याऽपि मे * मातारंभादिनटनं त्वया । मदीय-

* मातः इति पदच्छेदः ।

नर्तकीबृन्दनर्तनं वीक्ष्य हृष्यताम् ॥ नृत्तम् ॥ समस्तराजोपचा-रदेवोपचारपूजां समर्पयामि ॥ कारुण्यनिलये सीते काकुत्स्थ-प्रियवल्लभे । पूजान्तेऽद्य मया दत्तं क्षीरार्घ्यं संगृहाण भोः ॥ क्षीरार्घ्यप्रदानम् ॥ अथोपायनदानम् ॥ अथ सभर्तृकाभ्यः स्त्रीभ्यो हरिद्राकुङ्कुमचन्दनपुष्पवस्त्रकञ्चुकादिस्त्रीद्रव्याणि स्त्री-भिरेव दापयेत् ॥ अपूजिताऽपि रक्षःस्त्रीबृन्दाय करुणामधाः । कृताऽप्यविधिना पूजा यथावद्विहिताऽस्तु ते ॥ अनया पूजया जानकी प्रीयताम् ॥

इति पूजाक्रमः ॥

सुतीक्ष्णः—

इति विप्रोत्तराषाढां त्वं फल्गुन्यां परदेवताम् ।
आराधय युतः श्रद्धाभक्तिभ्यां विभवेन ते ॥१॥

स्वयमेष्यति पत्नी त्वां नष्टैराभरणैस्सह ।
दिव्यसिंहासनासीनां भगिनीभिश्च सेविताम् ॥२॥

ध्यायन् धिया रघूत्तंसप्राणनाथां व्रजाधुना ।

अगस्त्यः—

इत्येवमुपदिष्टस्स मुनीन्द्रेणोन्द्रकर्मणा ॥३॥

गृहमेत्य च संपाद्य द्रव्याण्यावश्यिकान्यथ ।
ऋक्षे चोत्तरफल्गुन्यां भक्तिश्रद्धायुतोऽद्विजः ॥४॥

सुतीक्ष्णं भावयन् बुद्ध्या गुरुवर्यं प्रणम्य तम् ।
आराधयामास जगज्जननीं बहुविस्तरैः ॥५॥

ब्राह्मणान् भोजयामास सुबहून् षड्रसान्नतः ।
रात्रौ च देवीं संपूज्य विसृज्य च यथाविधि ॥६॥

कुंभस्थान् तण्डुलान् विप्रः कुंभेन सह दत्तवान् ।
कस्यै चित्तु सुवासिन्यै सीतेयमिति भावयन् ॥७॥

मङ्गळद्रव्यजातं च ददौ पूर्वोक्तरीतितः ।
पट्टचेलं स्वर्णतन्तुस्यूतां चोळीं च दत्तवान् ॥८॥

क्षीरमात्राहारवान् स यामे रात्रौ द्वितीयके ।
श्रीसूक्तेन बृहत्साम्ना राजनेनापि सामतः ॥९॥

अन्यैश्च लौकिकैर्गानैरुर्वीपुत्रीमतोषयत् ।
अथ तृतीययामादौ सुष्वाप स्थण्डिले व्रती ॥१०॥

प्राप्ते चतुर्थयामे तु सीता सर्वाङ्गसुन्दरी ।
तद्दत्तकञ्चुळीवस्त्रभासमानाङ्गका स्वयम् ॥११॥

किरीटकटकाद्यैश्च मञ्जीरान्तैर्विभूषणैः ।
शोभिता दर्शयित्वा स्वं विप्रं स्वप्नेऽब्रवीद्वचः ॥१२॥

देवी—

धर्मशील प्रसन्नाऽस्मि वांछितं वृणु मे वरम् ।
मत्पूजोत्तरफल्गुन्यां न जातु विफलीभवेत् ॥१३॥

ब्राह्मणः—

जगदंब नमस्तुभ्यं जनकस्याद्भुते सुते ।
मम प्रनष्टा दयिता न तद्वार्ताऽपि श्रूयते ॥१४॥
सा चेदभग्नचारित्रा मां प्राप्नोतु सुदुर्भगा ।

यथा गता तथाऽऽयातु सर्वाभरणभूषिता ॥१५॥
वरमन्यं वृणोमीशे प्रसन्नां त्वां निरीक्ष्य वै ।
मम वंशाभिवृद्ध्यर्थं पुत्रो मे जायतां शुभः ॥१६॥
त्वत्पादपद्मयोर्भक्तिर्नित्या स्यान्मे तवाज्ञया ।

देवी—

पत्नीमभग्नचारित्रां लप्स्यसे श्वः प्रभातके ॥१७॥
भूषणानि च सर्वाणि तदीयानि च लप्स्यसे ।
पुनश्चोत्तरफल्गुन्यां प्रतिमासं च मां यज ॥१८॥
मासेषु द्वादशस्वेवं ततः पुत्रं च लप्स्यसे ।

अगस्त्यः—

इत्युक्त्वाऽन्तर्दधे देवी प्रबुबोध च स द्विजः ॥१९॥
किमेतदिति सञ्चिन्त्य विस्मयोत्फुल्ललोचनः ।
अथाशयित्वा चोत्थाय नित्यकर्माण्यकारयत् ॥२०॥
स्मरन् स्वाप्नं वरं देव्याः प्रत्यैक्षत निजां सतीम् ।
आद्ययामावसानेऽथ विमानवरमास्थितौ ॥२१॥
गन्धर्वदंपती कौचित् सुमुख्या सार्धमागतौ ।
प्रणतायाथ विप्राय तावब्रूतां प्रियं वचः ॥२२॥

गन्धर्वौ—

विप्रवर्य शृणु कथां तव भार्याश्रितां शुभाम् ।
आवां गतौ सिन्धुतीर मद्य प्रातर्यदृच्छया ॥२३॥
द्वीपे सान्तानिके रम्ये मुनीनामाश्रमान्तिके ।

आवां मनुष्यगन्धर्वौ व्यचराव मदोत्कटौ ॥२४॥
इयं तत्राभवद्दृश्या मूले वृक्षस्य कस्यचित् ।
अञ्जलिस्थैरविं पुष्पैरर्चन्ती मलिना कृशा ॥२५॥
अश्रुसंपूर्णनयना काङ्क्षन्ती भर्तृसङ्गमम् ।
काऽसीति पृष्टा प्राहस्म वाचा गद्गदयाऽथ नौ ॥२६॥
कान्यकुब्जे धर्मशीलाभिधविप्रोत्तमस्य च ।
अहं तु सदृशी भार्या तत्रासं तेन वै सुखम् ॥२७॥
कदाचिन्मत्पिताऽयाचन्मामेत्य द्रविणं बहु ।
धनं नेति ततोऽयाचद्भूषणं बहुमूल्यकम् ॥२८॥
स्त्रीस्वभावेन तद्दातुं मयाऽपि ह्यन्वमन्यत ।
तदर्थं सह पित्राऽहमनुज्ञाप्य पतिं बलात् ॥२९॥
अगमं पितृगेहाय मार्गमध्येऽथ चोरकैः ।
हतः पिता मे भूषाश्च सर्वा अपहृता मम ॥३०॥
समुद्रमध्ये क्षिप्ता चाप्यहं तत्रतु दुःखिता ।
मज्जनोन्मज्जनपरा काष्ठं किञ्चिदुपागमम् ॥३१॥
यदृच्छया वायुनाऽथ द्वीपमेतमवापिता ।
उत्तीर्य कथमप्यब्धे रुद्राक्षं मुनिमेककम् ॥३२॥
स मां विनिन्द्य बहुशः पतिद्रोहफलं त्विति ।
अन्ते मामाह भर्तारं प्राप्स्यसीह वसाश्रमे ॥३३॥
इत्युक्ताऽत्र फलाहाराऽऽराधयामि दिवाकरम् ।
इति श्रुत्वा वचस्तस्या अश्रुगद्गदभाषितम् ॥३४॥

अवादिष्व मुनिं प्राप्य किं सत्यमिदमित्यथ ।
तथेत्युक्त्वाऽऽदिशत्सोऽपि 'तामिमां भर्तृसन्निधिम् ॥
शीघ्रं प्रापयतं नस्याद्वियोगोवां कदाचन ।'
इत्याज्ञां मुनिवर्यस्य प्राप्य चादाय तामिमाम् ॥३६॥
विमानेनागतौ व्योम्ना तवेदं नगरं प्रति ।
मद्ध्येऽप्यशृणुव क्षित्यां तारं कञ्चन शब्दकम् ॥३७॥
कतमो गच्छति व्योम्ना परीपालय मां प्रभो ।
इहैहि कृपया स्वामिन् धर्मस्ते भविता महान् ॥३८॥
विलापमित्थं करुणं श्रुत्वाऽऽवां धरणीं गतौ ।
अपश्याव स्त्रियं काञ्चि द्विस्फुरन्तीं वयोऽधिकाम् ॥
काऽसि वृद्धे किमर्थं नावाहूताऽसीति पृष्टया ।
तया विमृज्य बाष्पांबु वाक्यमेतदकथ्यत ॥४०॥
नमो वो देवता भाथ शृणुताऽऽसाकदुस्थितिम् ।
शबराणां कुले जाता नाम्नाऽहं कलहप्रिया ॥४१॥
अष्टौ मम सुतास्सन्ति भ्रातरो दश पञ्च च ।
मृगान् हत्वाऽभ्यवहरन्ति * सर्वे ते चौर्यवृत्तयः ॥४२॥
एकदा भूसुरः कश्चित् तत्पुत्र्या साकमेकया ।
पथिकावागतौ सा तु बह्वाभरणभूषिता ॥४३॥
मदीयास्तं द्विजं हत्वा तांच प्रक्षिप्य वारिधौ ।
आहृत्य सर्वाभरणान्याययुर्मे गृहं प्रति ॥४४॥

---

* अक्षराधिक्यमार्षम् ॥

पुनरन्यत्र चौर्यार्थं गत्वाऽऽहृत्य धनं बहु ।
ह्यःप्रातरागतास्सर्वे सुप्ता आसायमेव च ॥४५॥

अत्राऽस्ति निकटे काली सा ह्यस्मत्कुलदेवता ।
रात्रावुत्थाय तां नन्तुं पुण्ये तत्र भृगोर्दिने ॥४६॥

तद्भूषणेषु तेष्वेकं तस्यै दातुं यदृच्छया ।
यावदादत्त वै ज्येष्ठस्तावत्क्रोशन् हहा इति ॥४७॥

पपात भूमौ निरसु स्तद्वीक्ष्य किमिति ब्रुवन् ।
द्वितीयो जगृहे तच्च सोऽप्यपप्तत्तथैव च ॥४८॥

तृतीयोऽपि तथा कुर्वन् मूढः पतितवान् क्षितौ ।
तावदन्यान्निवार्याहं मृतान् वीक्ष्य महीगतान् ॥४९॥

कालीकृतमिति ज्ञात्वा तदालय मुपेयुषी ।
अरोदिषं ता मुद्दिश्य वागुवाचाशरीरिणी ॥५०॥

मद्भक्तस्य प्रियाभूषा अनर्हास्ता ममाखिलाः ।
असंशयं मरिष्यन्ति स्पृशेयुस्तां विना च ये ॥५१॥

श्वःकालये यास्यति व्योम्ना कश्चिद्गन्धर्वसत्तमः ।
सा चैष्यति समं तेन तस्यै सर्वं प्रदापय ॥५२॥

सा भूषयित्वा सर्वाङ्गं यातु स्वरमणान्तिकम् ।
शेषास्तु त्वत्सुताः क्षेमं वर्तिष्यन्ते न संशयः ॥५३॥

सर्वेषा मन्यथा नाशो भविष्यति न संशयः ।
एतच्छ्रुत्वा दिव्यवाक्यं गृहमागत्य सत्वरा ॥५४॥

निवार्यान्यान् मत्तनयान् प्रतीक्षे त्वां खदर्शना ।

बुद्ध्याऽहमनुपश्यामि * एषा सा कालिकोदिता ॥५५॥
अंबाऽऽगच्छ गृहं मेऽद्य त्वद्भूषा धारयस्व च ।
इति श्रुत्वाऽपि वृद्धाया वाचं नो § विश्वसित्यसौ ॥
आवामेनां ततो नीत्वा तद्गृहं भूषणान्यथ ।
अग्राहयाव सर्वाणि सा ततोऽङ्गान्यलंकरोत् † ॥५७॥
स्मितास्यां सुमुखीं नत्वा प्रेषयामास साऽथ नः ।
एवमेषा द्विजश्रेष्ठाऽऽनीता मुनिंदराज्ञया ॥५८॥
प्रतीच्छ भार्यां गच्छाव इति तौ जग्मतुर्द्रुतम् ।
धर्मशीलस्तु सन्तुष्टो ज्ञात्वा भार्याचिकीर्षितम् ॥५९॥
तामाह दैवमेव त्वा मशिक्षयदतः क्षमे ।
अङ्गीकृत्येति तामुक्त्वा सीतायै प्राणमन्मुहुः ॥६०॥
सर्वदेवात्मिका सीता नूनं सा परदेवता ।
अन्यथा सा कथं काली स्वभक्तं मां वदेत् स्फुटम् ॥
इति सञ्चिन्त्य सीताया महिमानमवोचत ।
तत्रागतेभ्यः पौरेभ्यस्ततो धर्मान् यथापुरम् ॥६२॥
भक्त्या समाचरद्धर्षान्नित्यं सीतां समर्चयन् ।
देव्यादिष्टप्रकारेण यावद्वत्सरपूरणम् ॥६३॥
प्रतिमासं चोत्तरस्यां फल्गुन्यां जानकीव्रतम् ।

---

* संहिताया अविवक्षितत्वात् सन्ध्यभावः ।

§ भूतेऽपि लडार्षः ।

† आगमशास्त्रस्यानित्यत्वादडागमाभावः ।

पूर्वोक्तेन प्रकारेण धर्मशीलोऽचरन्मुदा ॥६४॥
अथ सा गर्भमाधत्त सुमुखी वत्सरे गते ।
सुषाव तनयं दिव्यं सीतादेवीप्रसादजम् ॥६५॥
धर्मशीलश्च सुमुखी हर्षांभोधौ ममज्जतुः ।
स कुमारस्तु विद्यावान् ह्रीमान् धीमान् वीनीतिमान् ॥
यौवने सदृशीं भार्यां पित्रा संपादितां शुभाम् ।
प्राप्य शुश्रूषया मातापितरौ बह्वतोषयत् ॥६७॥
काले गतेऽथ महति निवेश्य तनये गृहम् ।
वैकुण्ठं दंपती प्राप्तौ सीतारामप्रसादतः ॥६८॥

अगस्त्यः—

इदमाख्यानमव्यग्र इतिहासं पुरातनम् ।
पूजादिने पूर्वरात्रौ श्रुत्वा प्राप्नोत्यभीप्सितम् ॥६९॥
येच भक्त्या भूमिपुत्र्याः शृण्वन्त्याख्यानमद्भुतम् ।
आदेहं च सुखं प्राप्य देहान्ते मुक्तिमाप्नुयुः ॥७०॥
प्रतिशुक्रदिनं श्रोतुः कथामेतां तु वत्सरम् ।
आत्मानं दर्शयेदादौ स्वप्ने वीटीलसन्मुखी ॥७१॥
ततः स्मृता सन्निदद्ध्यात् धर्मकामार्थवर्षिणी ।
एतत्ते कथितं सर्वं सीताया वैभवं महत् ॥७२॥
इतः परं तां मन्यस्व स्वतपःफलमूर्जितम् ।
ध्यायंस्तां मनसा वाचा वदस्व * परदेवताम् ॥७३॥

---

* भासनोपसंभाषेत्यादिना ज्ञाने तङ् ।

सीताषडक्षरजपाः सीताऽनुध्यानतत्पराः ।
भृगुवारेषु सीतायाः पूर्वोक्ताङ्गार्चने रताः ॥७४॥

सीतापदार्पितस्वार्था न मनुष्या मता मम ।

जनकः—

कुंभसंभव सर्वज्ञ नमस्तेऽस्तु पुनर्नमः ॥७५॥

वात्सल्याख्यं मलं तस्यां क्षालितं त्वद्वचोऽमृतैः ।
अहं च पूजयिष्यामि सीतां सर्वसमृद्धये ॥७६॥

मूलप्रकृतिरूपां तां मत्वा मुक्त्यर्थमाश्रये ।
इदं तु ज्ञातुमिच्छामि वद कारुण्यतो मयि ॥७७॥

सीताषडक्षरी कीदृग्ध्यानन्यासादिकं च किम् ।
कथं जपः प्रकर्तव्यो वद विस्तरतोऽधुना ॥७८॥

अगस्त्यः—

वक्ष्यामि शृणु राजेन्द्र मन्त्रं सर्वार्थसिद्धिदम् ।
विना येन भवेत्पूजा सीतायाः स्वल्पसिद्धिदा ॥७९॥

(1) लक्ष्मीबीजं वदेदादौ सीतां ङेऽन्तं (2) ततो वदेत् ।
ततो वदेद्वह्निजायां (3) षड्वर्णो मन्त्र ईरितः ॥८०॥

त्वमेवर्षिस्तु मन्त्रस्य यत आदौ त्वयैव तु ।
ज्ञातस्सद्दशशिष्येभ्यः ततः प्रख्यापयिष्यसि ॥८१॥

गायत्री छन्द एतस्य बीजमुक्तं तु पूर्वतः ।

---

(1) श्रीं (2) सीतायै (3) स्वाहा

नमश्शक्तिः कीलकं तु सीतायै (4) इति कीर्तितम् ॥
षड्दीर्घभाजा बीजेन षडङ्गन्यासकल्पना ॥

अथ ध्यानम्—

षट्कोणे मद्धचभागे कनकजलरुहे सीदतो राघवेन्दो
रङ्कस्थां पद्महस्तां मणिखचितमहाभूषणोदारभासम् ।
तप्तस्वर्णाभदेहां रघुपतिवदनाम्भोजविन्यस्तदृष्टिं
मन्दस्मेरां मनोऽब्जे मुनिगणविनुतां जानकीं भावयामि॥
वर्णलक्षं जपेन्मन्त्रं ततस्सिद्धिमवाप्नुयात् ॥८४॥

राममन्त्रेण संयोज्य सीतामन्त्रं जपेत्तु यः ।
तस्याऽऽदेहं सर्वसुखं कैवल्यं तु ततो भवेत् ॥८५॥

कुङ्कुमेऽष्टदळं पद्ममालिख्याऽन्नाक्षराणि यः ।
मन्त्रस्यादौ तथाऽन्ते च गौर्या बीजं तथा भुवः ॥८६॥

जप्त्वाऽयुतं कुङ्कुमं तत् मत्वा सीताशरीरकम् ।
नीराजनान्तोपचारान् कृत्वा भक्तिप्रतीरितः ॥८७॥

शिरसा कुङ्कुमं धृत्वा कुबेरादपि ऋद्धिमान् ।
भवेत् भूतपिशाचादिग्रहपीडां व्यपोहयेत् ॥८८॥

राममन्त्रविहीनस्तु सीतामन्त्रं तु यो जपेत् ।
न कदाचित्तस्य सिद्धिः नरकश्चापि शाश्वतः ॥८९॥

राममालामन्त्रजपानन्तरं जानकीं हृदा ।
ध्यात्वा मालामनु तस्याः प्रजपेत्तु जितेन्द्रियः ॥

---

(4) स्पष्टप्रतिपत्तये नकृतस्सन्धिः ॥

(तदित्थम्) आदौ नमो भगवति मैथिलीति ततःपरम् ।
त्रिलोकजननि ब्रूयात् राघवप्राणवल्लभे ॥

वदेत्ततो राक्षसान्तकारिणीति पदं वदेत् ।
शुद्धसत्वस्वरूपेऽथ नमस्ते नम इत्यथ ॥

मालामन्त्रोऽयमाख्यातः प्रणवादिश्च सर्वदः ।
* सीताराघवमन्त्रौ तु मुक्त्यर्थं केवलं जपेत् ।
अनयोस्तर्पणे होमे न निर्बन्धः कदाचन ॥९३॥

यत्सङ्ख्यया राममन्त्रं प्रजपेत्साधको व्रती ।
तन्न्यूनसङ्ख्यया सीतामन्त्रो जप्यो मनीषिभिः ॥९४॥

भृगुवारे च फल्गुन्या मुत्तरायां च पर्वणि ।
ततोऽधिकं च प्रजपेत् अन्यथा सिद्धिरल्पिका ॥९५॥

सीतारामौ हृदाऽऽभाव्य प्रजपन् हनुमन्मनुम् ।
प्रयोगान् साधयेत्तेन विन्देत् सर्वमनोरथान् ॥९६॥

न कदाचित् प्रयोगार्हौ सीताराघवमन्त्रकौ ।
तथाकृते प्रकुपितो हनुमान् सिद्धिभङ्गकृत् ॥९७॥
इति ते सर्वमाख्यातं साधयामि नृपोत्तम ।

सनत्कुमारः—

इत्युक्त्वा जनकेन्द्रेण पूजितः प्रययौ मुनिः ॥९८॥

---

* मालामन्त्रस्त्वेव मुक्तो भवति—तथाहि 'ओं नमो भगवति मैथिलि त्रिलोकजननि राघवप्राणवल्लभे राक्षसान्तकारिणि शुद्धसत्वस्वरूपे नमस्ते नमः' इति ॥

तस्मात् सीतां ज्ञानिनोऽपि पूजयन्ति मुमुक्षवः ।
त्वमप्येवं रामपत्नीं पूजय प्रयताशयः ॥९९॥

जप सीतामनुं पूतो ध्यात्वा तां जगदीश्वरीम् ।
एतत्ते कथितं सर्वं कहोळ मुनिसत्तम ॥१००॥

जनकागस्त्यसंवादं मयोक्तं प्रयतः पठन् ।
धनधान्यं पुत्रपौत्रान् यशश्च परमं भुवि ॥
परविद्यां च संप्राप्य तन्वन्ते मुक्तिमाप्नुयात् ॥

इत्यगस्त्यसंहितायां कहोळसनत्कुमारसंवादे
जनकाय कुंभसंभवोक्तं
सीतापूजाविधानं समाप्तम् ॥

---

इति श्रीरामभक्तिकल्पलतायां
उत्तरभागः समाप्तः ॥
श्री सीतारामाभ्यां नमः ॥

---